Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

Mod Lodha Jain

श्री स्थानकवासी जैन ग्रन्थमाला पुष्प नं० १
(पूज्य श्री श्री १००८ श्री श्रीलालजी महाराज की स्मृति-स्वरूप)

H

श्रीवीतरागाय नमः

# वृत्त-बोधः

(संस्कृत भाषा का एक उत्कृष्ट छन्दोग्रन्थ)

प्रकाशक—

श्री श्वेताम्बर साधुमार्गी जैन
हितकारिणी संस्था,
बीकानेर (राजपूताना)

वीर संवत् २४५४ विक्रम सं० १९८५ | प्रथमावृत्ति १००० | न्योछावर =)

For Private And Personal Use Only

सदा से भारतीय साहित्य में शान्त, करुण तथा वीर रस की प्रधानता रही है; परन्तु आज से कुछ दिन पहले इस साहित्य-क्षेत्र में शृङ्गार का एक भारी तूफान आया था, जिसमें बड़े बड़े पण्डित और साहित्य के आचार्य पड़कर पथभ्रष्ट हो गये- वे आप तो गये ही, साथ ही पीछे के लोगों को भी सदा के लिए भ्रष्ट करने का मार्ग खोल गये। काव्य, नाटक, छन्दःशास्त्र, कहां तक कहूं, वैद्यक-शास्त्र तक में, वही पतित शृङ्गार किंवा शृङ्गाराभास का विष मिश्रित कर दिया गया, जिससे हमारा समाज गलिताङ्ग हो गया है।

संस्कृत के छन्दो-ग्रन्थों में भी यही बात है। 'श्रुतबोध' आदि के 'घन-पीन-पयोधर-भार-नते' वाले श्लोक कौनसा लौकिक गुरु अपने शिष्य को, पिता अपने पुत्र और पुत्री को तथा मा अपनी बेटी को निःसङ्कोच होकर पढ़ा सकती है? फिर यह प्रारम्भिक विषय है—काव्य-प्रासाद पर चढ़ने के लिए प्रथम सीढ़ी है। बालक-बालिकाओं को 'नत-पीन-पयोधर' का अर्थ कोई कैसे समझा सकता है? और बिना समझाए शिष्य मन्द-बुद्धि होगा। क्या हमारे समाज और साहित्य के लिए यह अभीष्ट है?

हिन्दी में इस विषय के अभाव की पूर्त्ति प्रख्यात-कीर्त्ति बाबू श्री जगन्नाथदास 'भानु' कवि ने 'छन्द-प्रभाकर' की रचना करके करदी है। परन्तु, संस्कृत भाषा के क्षेत्र में अभी तक इधर किसी ने ध्यान ही नहीं दिया है। इसी अभाव की पूर्त्ति के लिए यह पुस्तक लिखी गई है। आशा है, इस से हमारे साहित्य और समाज का कल्याण होगा।

पुस्तक लिखने में सरलता पर विशेष ध्यान रखा गया है और उन भावों के लाने का प्रयास किया गया है, जो अति आवश्यक हैं। विशेषतः पाठशालाओं और विद्यालय-महाविद्यालयों के पाठ्य-ग्रन्थों में सम्मिलित होने योग्य इस में सामग्री रखी गयी है।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री ॥

# वृत्तबोधस्य

## शुद्धिपत्रम् ।

| पृ | पं | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| ८ | २१ | नैकंवचनम् । | नैकवचनम् । |
| १० | २१ | सप्तर्भि० | सप्तभि० |
| ,, | ,, | विरामः- | विरामे- |
| ११ | १ | (यस्यां सत्यां) | ( यत्यां सत्यां ) |
| ११ | ६ | विरामें | विरामे |
| १२ | १५ | ०वर्ण० | ०वर्णे० |
| १४ | २० | सातवें | छठे |
| १५ | ८ | ततजै० | जतजै० |
| २६ | १७ | यथा | यथा |
| २७ | १४ | ऽत्तर | ऽत्तरे |
| ३३ | १५ | और लघु | लघु और गुरु |
| ३३ | १६ | (IIISSSSSIIISSIIIS) | (ISSSSSIIIIISSIIIS) |
| ४० | २ | ०वर्णाः, | वर्णाः, |
| ४० | ११ | पञ्चभिः=पञ्चभिः= | पञ्चभिः पञ्चभिः |
| ४६ | २१ | ०मचिरे | ०मूर्च्छिरे |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# वृत्तबोधस्य

## विषयानुक्रमः।


| श्लोक छन्दोनाम | पृष्ठ |
| --- | --- |
| १ मङ्गलाचरण | १ |
| २ परिभाषा | २ |
| ३ गुरुलघुविचार | २ |
| ४ गणविचार | ३ |
| ५ गणविचार | ३ |
| **छन्दोविचार.** | |
| ६ अनुष्टुप् | ५ |
| ७ पद्य | ६ |
| **मात्रावृत्ति** | |
| ८ आर्या | ६ |
| ९ गीति | ७ |
| १० उपगीति | ८ |
| **समाक्षर छन्दों के लक्षण** | |
| ११ नगस्वरूपिणी(प्रमाणिका) | ८ |
| १२ विद्युन्माला | ९ |
| १३ शालिनी | १० |
| १४ चम्पकमाला | ११ |
| १५ रुक्मवती (मणिबन्ध) | १२ |
| १६ दोधक | १३ |
| १७ इन्द्रवज्रा | १४ |
| १८ उपेन्द्रवज्रा | १५ |
| १९ उपजाति | १६ |
| २० आख्यानिकी | १७ |
| २१ रथोद्धता | १८ |
| २२ स्वागता | १९ |
| २३ तोटक | १९ |
| २४ प्रमिताक्षरा | २० |
| २५ भुजङ्गप्रयात | २१ |
| २६ जलोद्धतगति | २२ |
| २७ द्रुतविलम्बित | २३ |
| २८ हरिणीप्लुता | २४ |
| २९ वंशस्थ | २५ |
| ३० इन्द्रवंशा | २६ |
| ३१ प्रभावती | २७ |
| ३२ प्रहर्षिणी | २८ |
| ३३ वसन्ततिलका | २९ |
| ३४ मालिनी | ३० |
| ३५ हरिणी | ३१ |
| ३६ शिखरिणी | ३२ |
| ३७ पृथ्वी | ३३ |
| ३८ मन्दाक्रान्ता | ३५ |
| ३९ हंसी | ३६ |
| ४० शार्दूलविक्रीडित | ३७ |
| ४१ स्रग्धरा | ३८ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | | | | | |
|---|---|---|---|---|---|
| ४२ | पणबन्ध | ४० | ४९ | प्रहरणकलिता | ४८ |
| ४३ | मत्ता | ४० | ५० | भ्रमरविलसित | ४९ |
| ४४ | मणिगुणनिकर | ४१ | ५१ | स्रक् (माला) | ५० |
| ४५ | कुड्मलदन्ती | ४३ | ५२ | वियोगिनी | ५२ |
| ४६ | वैश्वदेवी | ४४ | ५३ | पुष्पिताग्रा | ५३ |
| ४७ | कुसुमविचित्रा | ४५ | ५४ | द्रुतमध्या | ५४ |
| ४८ | स्रग्विणी | ४६ | ५५ | समाप्तिश्लोक | ५५ |


॥इति॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री वीतरागाय नमः ॥

# वृत्तबोधः

**छन्दसां सुप्रसिद्धाना,-माबालं बुद्धये मया ।**
**श्रीजिनेन्द्रं प्रणम्यादौ, वृत्तबोधो विरच्यते ॥ १ ॥**

पूज्याङ्घ्रि-कमलद्वन्द्व,-मकरन्दमधुव्रतः ।
घासीलालस्तनोतीमां, वृत्तबोध-प्रकाशिकाम् ॥

**(अन्वयः)** *छन्दसामिति--आदौ श्रीजिनेन्द्रं प्रणम्य सुप्रसिद्धानां छन्दसाम् आबालं बुद्धये मया वृत्तबोधो विरच्यत इत्यन्वयः ॥*

**(टीका)** प्रथमतः श्रीजिनेन्द्रं=भगवन्तमर्हन्तं प्रणम्य बाल-पर्यन्तैर्मन्दमतिभिरपीति यावत् सुप्रसिद्धानां छन्दसां=पद्यानां बुद्धये=बोधाय मया श्रीजवाहिरलालाचार्येण 'वृत्तबोधः' एतन्नामको ग्रन्थो विरच्यते=निर्मीयत इत्यर्थः ।

**(प्रतिशब्दाः) आदौ=***प्रथमतः* । **आबालम्=***बाल-पर्यन्तैः । शिष्टं स्पष्टम् ।*

**(भाषा)** प्रथम श्रीजिन भगवान को नमस्कार करके अल्पबुद्धिवालों को प्रसिद्ध प्रसिद्ध छन्दों का ज्ञान हो, इसलिए यह वृत्तबोध बनाया जाता है ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## परिभाषा ।

**यस्य यस्यास्ति यद्यत्तु, लक्षणं छन्दसो मतम् ।**
**तेन तेनैव पद्येन, तत्तदत्र प्रवक्ष्यते ॥ २ ॥**

**(अन्वयः)** *यस्य यस्य छन्दसः यद्यत् तु लक्षणं मतमस्ति अत्र वृत्तबोधे तत्तत् तेन तेनैव पद्येन प्रवक्ष्यत इत्यन्वयः ।*

**(टीका)** तुशब्दोऽवधारणार्थस्तेन यस्य यस्य छन्दसो यद्यदेव स्वरूपं निर्णीतमस्ति (छन्दःशास्त्रे इति शेषः) तत्तत्तेन तेनैव पद्येनात्र वृत्तबोधे कथयिष्यत इत्यर्थः ।

**(प्रति०)** **छन्दसः**=*वृत्तस्य* । **तु**=*एव* । **लक्षणं**=*स्वरूपम्* । **प्रवक्ष्यते**=*कथयिष्यते* ।

**(भाषा)** जिस जिस छन्द का जो जो लक्षण है इस वृत्तबोध में उस को उसी छन्द से कहा जायगा ॥ २ ॥

### (गुरुलघुविचार)

**वा पादान्ते गुरु ज्ञेय,-मनुस्वारविसर्गयोः ।**
**संयोगे परतश्चाद्यं, दीर्घं च स्याद्यदक्षरम् ॥३॥**

**(अन्वयः)** *पादान्ते वा गुरु ज्ञेयम्, अनुस्वारविसर्गयोः संयोगे च परत आद्यम्, यच्चाक्षरं दीर्घं स्यादित्यन्वयः ॥*

**(टीका)** चरणान्ते यदक्षरं तद्विकल्पेन द्विमात्रं बोध्यम्, अनुस्वारे विसर्गे तथा संयुक्तवर्णे परे पूर्वम् , किञ्च दीर्घं यदक्षरं तदपि द्विमात्रमित्यर्थः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(प्रति०) पादान्ते**=चरणान्ते । **गुरु**=द्विमात्रम् । **ज्ञेयं**=बोध्यम् । **संयोगे**=संयुक्तवर्णे । **परतः**=परे । **च**=तथा । **प्राग्**=पूर्वम् । **च**=किञ्च ।

**(भाषा)** प्रत्येक चरण के अन्त का ह्रस्व अक्षर विकल्प से गुरु माना जाता है, अर्थात् जहां गुरु बोलने से श्लोक की सुन्दरता आती हो, वहां गुरु और अन्यत्र लघु रहता है। इसी प्रकार अनुस्वार विसर्ग तथा संयुक्त वर्ण पर हो तो पहला ह्रस्व वर्ण गुरु होता है, एवं दीर्घ भी गुरु होता है ॥ ३ ॥

(गणविचार)

**छन्दोजिज्ञासुभिर्बोध्या भजसा,-यरता मनौ ।**
**सर्वत्रैते गणा अष्टौ, गो गुरुर्लो लघुस्तथा ॥ ४ ॥**

**(अन्वयः)** *छन्दोजिज्ञासुभिः 'भजसाः यरताः मनौ' एते अष्टौ गणाः सर्वत्र बोध्याः, तथा गः गुरुः लः लघुः ।*

**(टीका)** छन्दोज्ञानमिच्छुभिः सर्वत्र भ-ज-स-य-र-त-म-न- संज्ञका अष्टौ गणा बोध्याः, तथा गः=गुरुसंज्ञकः, लः-लघुसंज्ञको बोद्धव्य इत्यर्थः ।

**(प्रति०)** *प्रतिशब्दाः स्पष्टाः ।*

**(भाषा)** छन्द के जानने वालों को सर्वत्र भगण जगण सगण यगण रगण तगण मगण और नगण, ये आठ गण, तथा 'ग' से गुरु और 'ल' से लघु समझना चाहिये ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**आदिमध्यान्तभागेषु भजसा गुरवः क्रमात्।**
**यरता लघुतायुक्ता मनौ गुरुलघू तथा ॥५॥**

**(अन्वयः)** *भजसा आदिमध्यान्तभागेषु क्रमात् गुरवः यरता लघुतायुक्ताः, तथा मनौ गुरुलघू ।*

**(टीका)** भगण-जगण-सगणा आदिमध्यान्तभागेषु क्रमशो गुरवः, अर्थादादिभागे गुरुर्भगणो,-मध्यभागे गुरुर्जगणो,-ऽन्तभागे गुरुः सगण इति। एवं यगण-रगण-तगणा लघवः,-अर्थादादिभागे लघुर्यगणो,- मध्यभागे लघू रगणो,-ऽन्तभागे लघुस्तगण इति । तथा सर्वगुरुर्मगणः, सर्वलघुर्नगण इत्यर्थः । इदमत्र तत्त्वम्–प्रतिगणं गुरुलघुरूपास्त्रयः स्वरवर्णा भवन्ति, तत्र गुरुचिह्नम्–(ऽ) इति, लघुचिह्नम्– (।) इति, एवं च आदिगुरुर्भगणो यथा -(ऽ।।) इति, मध्यगुरुर्जगणो यथा- (।ऽ।) इति, अन्तगुरुः सगणो यथा–(।।ऽ) इति, आदिलघुर्यगणो यथा–(।ऽऽ) इति, मध्यलघू रगणो यथा–(ऽ।ऽ) इति, अन्तलघुस्तगणो यथा–(ऽऽ।) इति, सर्वगुरुर्मगणो यथा–(ऽऽऽ) इति, सर्वलघुर्नगणो यथा–(।।।) इतीति ।

**(प्रति०) क्रमात्=**क्रमशः । **लघुतायुक्ताः=**लघवः । *शिष्टं स्पष्टम् ।*

**(भाषा)** इन उक्त गणों में भगण आदिगुरु जैसे–(ऽ।।). जगण मध्यगुरु जैसे–(।ऽ।). सगण अन्त्यगुरु जैसे–(।।ऽ). यगण आदिलघु जैसे–(।ऽऽ). रगण मध्यलघु जैसे–(ऽ।ऽ). तगण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्त्यलघु जैसे-(ऽऽ।).मगण सर्वगुरु जैसे-(ऽऽऽ).और नगण सर्वलघु जैसे-(।।।). तथा गुरु जैसे-(ऽ). एवं लघु जैसे-(।). जानना चाहिये। ध्यान रहे कि प्रत्येक गण तीन तीन स्वर वर्णों से बनता है ॥ ५ ॥

## छन्दविचार.

### अनुष्टुप्.

**पञ्चमं लघु सर्वत्र, गुरु षष्ठमनुष्टुभि।**
**पादयो राद्ययो र्दीर्घं,— मन्ययोर्लघु सप्तमम् ॥६॥**

**(अन्वयः)** *अनुष्टुभि सर्वत्र पञ्चमं लघु षष्ठं गुरु, आद्ययोः पादयोः सप्तमं दीर्घम् अन्ययोर्लघु ॥*

**(टीका) अनुष्टुप्**छन्दसि चतुर्षु पादेषु प्रतिपादं पञ्चममक्षरं लघु षष्ठं च गुरु तथा श्लोकपूर्वार्द्धपरार्द्धाद्ययोः=प्रथमतृतीययोः पादयोः सप्तमं गुरु अवशिष्टयोर्द्वितीयचतुर्थयोः पादयोः सप्तमं लघु भवतीति शेष इत्यर्थः ॥

**(प्रति०) सर्वत्र**=*सर्वपादेषु* । **अनुष्टुभि**=*अनुष्टुप् छन्दसि* । **आद्ययोः**=*प्रथमतृतीययोः* । **अन्ययोः**=*द्वितीयचतुर्थयोः* ॥

**(भाषा) अनुष्टुप्**छन्द के चारों चरणों का पांचवाँ अक्षर लघु और छठा गुरु, तथा पहले और तीसरे चरण का सातवाँ गुरु एवं दूसरे और चौथे चरण का सातवाँ लघु होता है ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पद्य

**पञ्चमं लघु षष्ठं च, गुरु सर्वत्र निश्चितम् ।**
**युग्मयोः पादयोः पद्ये, सप्तमं च तथा लघु ॥७॥**

**(अन्वयः)** *पद्ये सर्वत्र पञ्चमं लघु षष्ठं च गुरु तथा युग्मयोः पादयोः सप्तमं च लघु निश्चितम् ॥*

**(टीका)** **पद्य**नामके छन्दसि सर्वेषु पादेषु पञ्चममक्षरं लघु षष्ठं गुरु तथा द्वितीयचतुर्थपादयोः सप्तमं च लघु नियतमित्यर्थः ॥

**(प्रति०)** **निश्चितं**=*नियतम्* । **युग्मयोः**=*द्वितीयचतुर्थयोः । स्पष्टमितरत् ।*

**(भाषा)** **पद्य**छन्द के भी चारों चरणों का पांचवाँ अक्षर लघु तथा छठा गुरु ही रहता है किन्तु केवल दूसरे और चौथे चरण का सातवाँ अक्षर लघु होता है ॥ ७ ॥

## मात्रावृत्ति.

आर्या.

**प्रथमे तथा तृतीये, द्वादश मात्रा भवन्ति यदि पादे ।**
**अष्टादश द्वितीये, तुर्ये चेत् पञ्चदश साऽऽर्या ॥८॥**

**(अन्वयः)** *यदि चेत् प्रथमे तथा तृतीये पादे द्वादश, द्वितीयेऽष्टादश, तुर्ये पञ्चदश मात्रा भवन्ति सा आर्या ॥*

**(टीका)** यदि चेत् प्रथम-तृतीयचरणयोर्द्वादश, द्वितीयेऽष्टादश तथा चतुर्थे पञ्चदश मात्राः=लघुगुरुसंकलनया मात्रिकाः स्वरवर्णा जायन्ते (तदेति शेषः) सा **आर्या**नाम्नी वृत्तिरित्यर्थः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मात्रावृत्तिरियं पिङ्गलादिषु प्रसिद्धा, एतत्प्रभेदेऽपि मात्रा एव परिगण्यन्ते ॥

(प्रति०) **तुर्ये**=चतुर्थे । *उक्तमवशिष्टम्* ।

**(भाषा)** जिस के पहले तथा तीसरे चरण में बारह बारह, और दूसरे में अठारह, तथा चौथे में पन्द्रह मात्राएँ हों वह **आर्या** छन्द कहलाता है ॥ ८ ॥

गीति

**पूर्वार्द्धवदार्याया,-**
**यत्र परार्द्धं च जायते वृत्तौ ।**
**कविकुलतिलकैः सर्वैः,**
**सेयमिहाऽऽर्यैव गीयते गीतिः ॥९॥**

**(अन्वयः)** *यत्र वृत्तौ आर्यायाः पूर्वार्द्धवत् परार्द्धं च जायते, सर्वैः कविकुलतिलकैः इह सा इयम् आर्यैव गीतिः गीयते ॥*

**(टीका)** यस्याम् आर्यायां प्रथमद्वितीयचरणतुल्यस्तृतीयचतुर्थचरणयोरपि मात्रान्यासो जायते, अर्थात् प्रथमवत्तृतीयेऽपि द्वादश, द्वितीयवच्चतुर्थेऽप्यष्टादश मात्रा भवन्ति इह=छन्दःशास्त्रे सेयमार्यैव **गीति**रिति नाम्ना सर्वैर्महाकविभिः कथ्यत इत्यर्थः ॥

(प्रति०) **पूर्वार्द्धवत्**=*प्रथमद्वितीयचरणद्वयवत्* । **परार्द्धं**=*तृतीयचतुर्थचरणद्वयम्* । **च**= *अपि* । **कविकुलतिलकैः**=*महाकविभिः* । **गीयते**=*कथ्यते* ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(भाषा)** आर्या के पहले दूसरे चरणों के बराबर यदि तीसरा और चौथा चरण भी हो जाय तो उसे **गीति** छन्द कहते हैं ॥९॥

उपगीति.

**आर्योत्तरार्द्धवत्स्या,-द्यस्यां पूर्वार्द्धमपि बद्धम् ।**
**तामुपगीतिं कविजन,-मानसहंसाः प्रभाषन्ते ॥**

**(अन्वयः)** *यस्याम् आर्योत्तरार्द्धवत् पूर्वार्द्धमपि बद्धं स्यात्, कविजनमानसहंसाः ताम् उपगीतिं प्रभाषन्ते ॥*

**(टीका)** यस्यामार्यावृत्तेरुत्तरार्द्धसदृशं पूर्वार्द्धमपि निरूपितं भवेत् अर्थात् प्रथमतृतीययोः पादयोर्द्वादश द्वादश मात्राः, द्वितीयचतुर्थयोश्च पञ्चदश पञ्चदश मात्राः स्युः कविकुलशिरोमणयस्ताम् **उपगीतिं** कथयन्ति ॥

**(प्रति०) बद्धं**=*निरूपितम् ।* **कविजनमानसहंसाः**=*कविकुलशिरोमणयः । स्फुटमन्यत् ।*

**(भाषा)** आर्या के तीसरे चौथे चरणों के समान पहला और दूसरा भी चरण हो तो उसे **उपगीति** छन्द कहते हैं ॥

# समाक्षर छन्दों के लक्षण

नगस्वरूपिणी (प्रमाणिका)

**गुरु द्वितीय-तुर्य षष्ठमष्टमं च यत्र ताम् ।**
**नगस्वरूपिणीं परे,-ऽपरे प्रमाणिकां जगुः ॥११॥**

१ द्वितीयं च तुर्यं च षष्ठं चैतेषां समाहारद्वन्द्वेनैकवचनम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(अन्वयः)** *यत्र द्वितीयतुर्यषष्ठम् अष्टमं च गुरु, तां परे नगस्वरूपिणीम् अपरे प्रमाणिकां जगुः ॥*

**(टीका)** यस्यां प्रतिचरणमष्टावष्टावक्षराणि तेषु द्वितीयं चतुर्थं षष्ठमष्टमं चाक्षरं गुरु भवति तां केचित् (कवय इति शेषः) **नगस्वरूपिणीम्**, अन्ये **प्रमाणिका**मूचुः । अत्र प्रतिचरणं जगणरगणाभ्यां परतो लघुगुरुन्यासात्–(।ऽ।ऽ।ऽ।ऽ) इति स्वरवर्णक्रमो बोध्यः ॥

**(प्रति०) परे**=*केचित् ।* **अपरे**=*ततोऽन्ये ।* **जगुः**= *ऊचुः । व्याख्यातमन्यत् ।*

**(भाषा)** जिस के प्रत्येक चरण में दूसरा चौथा छठा और आठवाँ अक्षर गुरु हो उसे कोई नगस्वरूपिणी और कोई प्रमाणिका छन्द कहते हैं । इस के प्रत्येक चरण में (।ऽ।ऽ।ऽ।ऽ) इतने स्वर वर्ण होते हैं ॥ ११ ॥

विद्युन्माला.

**तुर्ये तुर्ये विश्रामः स्या-,द्यस्यां दीर्घाः सर्वे वर्णाः ।**
**छन्दःशास्त्रे सेयं प्रोक्ता, माभ्यां गाभ्यां विद्युन्माला ॥**

**(अन्वयः)** *यस्यां तुर्ये तुर्ये विश्रामः स्यात्, सर्वे वर्णाः दीर्घाः, छन्दःशास्त्रे सेयं माभ्यां गाभ्यां विद्युन्माला प्रोक्ता ।*

**(टीका)** यस्यां चतुर्थे चतुर्थेऽक्षरे विरामः स्यात् तथा सर्वे वर्णा गुरवः स्युः, सेयं प्रतिचरणं मगणद्वयात् परं गुरुद्वय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संयुक्ता छन्दःशास्त्रे **विद्युन्माला** प्रोक्ता। अत्र प्रथमं मगण-द्वयं ततो गुरुद्वयेन प्रतिचरणं-(SSSSSSSS) इत्येवमष्टौ गुरवः संपद्यन्ते।

**(प्रति०) तुर्यै**=चतुर्थे। **विश्रामः**=*विरामः (यतिः)*। **दीर्घाः**=*गुरवः*। **माभ्यां**=*मगणद्वयेन*। **गाभ्यां**=*गुरुद्वयेन*। *अन्यत् स्पष्टम्*।

**(भाषा)** जिस के सभी वर्ण गुरु हों और प्रत्येक चरण के चौथे २ अक्षर पर यति विश्राम हो; अतएव दो मगण और दो गुरु अक्षरों से जिस के प्रत्येक चरण की पूर्ति होती हो,उसे विद्युन्माला छन्द कहते हैं। इसके प्रत्येक चरण में—(SSSSSSSS) इस प्रकार आठ आठ गुरु होते हैं ॥१२॥

शालिनी.

**षष्ठो वर्णस्तद्वदेवाष्टमान्त्यः,**
**पादे पादे ह्रस्वतां याति यत्र।**
**तुर्यैरश्वैर्विश्रमे सा कवीन्द्रैः,**
**शालिन्युक्ता मात्तताभ्यां गुरुभ्याम् ॥१३॥**

**(अन्वयः)** *यत्र पादे पादे षष्ठो वर्णः तद्वदेव अष्टमान्त्यः नवमः ह्रस्वतां याति तुर्यैः अश्वैःविश्रमे मात् तताभ्यां गुरुभ्यां सा कवीन्द्रैः शालिनी उक्ता ॥*

**(टीका)** यस्यां प्रतिचरणं षष्ठस्तथैव नवमो वर्णो लघुत्वं प्राप्नोति तथा आदितश्चतुर्भिस्तदुपरितश्च सप्तभिर्वर्णैर्विरामः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(यस्यां सत्यां) मगणादुत्तरं तगणद्वयेन सह गुरुद्वयसंनिवेशात् सा कविवरैः **शालिनी** कथिता। अत्र प्रतिचरणम्–(ऽऽऽऽ-ऽ।ऽऽ।ऽऽ) इत्येकादश स्वरवर्णा ज्ञेयाः ॥

**(प्रति०) तद्वदेव**=*तथैव* । **अष्टमान्त्यः**=*नवमः* । **ह्रस्वतां**=*लघुत्वम्* । **याति**=*प्राप्नोति* । **तुर्यैः**=*चतुर्भिः* । **अश्वैः**=*सप्तभिः* । **विश्रमे**=*विरामे* । **मात्**=*मगणात्* । **तताभ्यां**=*तगणाभ्याम्* ।

**(भाषा)** जिस के प्रत्येक चरण में छठा और नवाँ अक्षर लघु हो, तथा प्रथम अक्षर से लेकर चोथे, एवं पांचवें से लेकर सातवें अक्षर पर विश्राम हो, वह मगण तगण तगण के अनन्तर दो गुरुओं से प्रत्येक पाद की पूर्त्ति होने के कारण **शालिनी** नामक छन्द कहलाता है। इस के हर एक चरण में–(ऽऽऽऽऽ।ऽऽ।ऽऽ) इतने स्वर वर्ण होते हैं। १३॥

## चम्पकमाला.

**आद्यं तुरीयं पञ्चमषष्ठं, यत्र गुरु स्यादन्त्यमुपान्त्यम् ।**
**पञ्चमवर्णैर्लब्धविरामा, भान्मसगैः सा चम्पकमाला ॥**

**(अन्वयः)** *यत्र आद्य-तुरीयं, पञ्चम-षष्ठम्, उपान्त्यम्, अन्त्यं गुरु स्यात्। पञ्चमवर्णैः लब्धविरामा सा भात् मसगैः चम्पकमाला ॥*

---

१ आद्यञ्च तुरीयञ्चेत्यनयोः समाहारादेकवचनम् ।

२ पञ्चमञ्च षष्ठञ्चेत्यनयोः समाहारः । एवमीदृशस्थलेऽग्रेऽपि बोध्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(टीका)** यस्यां प्रतिपादं प्रथमं चतुर्थं पञ्चमं षष्ठं नवमं दशमं चाक्षरं गुरु स्यात् पञ्चमैः पञ्चमैवर्णैः प्राप्तो विश्रामो यया तथाभूता सा भगणादुत्तरं मगण-सगण-गुरुभिर्हेतुभि **श्चम्पक-माला** भवतीत्यर्थः। अत्र-(ऽ।।ऽऽऽ।।ऽऽ)इत्येवं स्वरवर्णक्रमः ॥

**(प्रति०) आद्य--तुरीयं**=*प्रथम-चतुर्थ* । **अन्त्यं**=*दशमम्* । **उपान्त्यं**=*नवमम्* । **लब्धविरामा**=*प्राप्तविश्रामा* **भात्**=*भगणात्* । **मसगैः**=*मगणसगण-गुरुभिः* ॥

**(भाषा)** जिसके प्रत्येक चरण का पहला चौथा पांचवाँ छठा नवाँ और दशवाँ अक्षर गुरु हो तथा पांचवें पांचवें अक्षर पर विश्राम हो भगण मगण सगण तथा एक गुरु से युक्त वह छन्द **चम्पकमाला** कहलाता है। इस के प्रत्येक चरण में– (ऽ।।ऽऽऽ।।ऽऽ) इस प्रकार स्वरवर्ण जानना चाहिए ॥१४॥

रुक्मवती (मणिबन्ध)

**अन्तिमवर्णन्यूनतया, चम्पकमालामेव पुनः ।**
**रुक्मवतीमूचुः कवयो,–ऽन्ये मणिबन्धं शुद्धधियः**

**(अन्वयः)** *कवयः चम्पकमालामेव पुनः अन्तिमवर्ण-न्यूनतया रुक्मवतीम् ऊचुः, अन्ये शुद्धधियो मणिबन्धम्* ॥

**(टीका)** प्रतिपादमन्तिमं वर्णं न्यूनीकृत्य अदत्त्वेत्यर्थः कवयः पुनश्चम्पकमालामेव **रुक्मवतीम्**, अन्ये विद्वांसो **मणि-बन्धमु**क्तवन्तः ॥ अत्र प्रतिपादं गणाः-(ऽ।।ऽऽऽ।।ऽ) इति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(प्रति०) अन्तिमवर्णन्यूनतया**=अन्तिमवर्णाभावेन। **ऊचुः**=उक्तवन्तः। **शुद्धधियः**=विद्वांसः॥

**(भाषा)** चम्पकमाला के प्रत्येक चरण के अन्तिम अक्षर को हटा देने से कितनेक कवि **'रुक्मवती'** और कितनेक **मणिबन्ध** कहते हैं॥१५॥

दोधक.

**यत्र गुरु प्रथमं च तुरीयं,**
**सप्तमकं दशमं च ततोऽन्त्यम्।**
**भत्रिक-गद्वयतः प्रतिपादं,**
**दोधकवृत्तमिदं प्रतिपाद्यम्॥१६॥**

**(अन्वयः)** *यत्र प्रथमं तुरीयं च सप्तमकं दशमं ततोऽन्त्यं च गुरु, इदं प्रतिपादं भत्रिक-गद्वयतः दोधकवृत्तं प्रतिपाद्यम्॥*

**(टीका)** यस्मिन् वृत्ते प्रथमं चतुर्थं सप्तमं दशममेकादशं चाक्षरं गुरु भवति तदिदं प्रतिचरणं भगणत्रय-गुरुद्वययोगेन **दोधकवृत्तं** वक्तव्यम्। अत्र-(ऽ॥ऽ॥ऽ॥ऽऽ) इति स्वरवर्णक्रमः॥

**(प्रति०) यत्र**=यस्मिन्। **तुरीयं**=चतुर्थम्। **अन्त्यम्**=एकादशम्। **भत्रिकं**=भगणत्रयम्। **गद्वयं**=गुरुयुग्मम्। **प्रतिपादं**=प्रतिचरणम्। **प्रतिपाद्यं**=वक्तव्यम्॥

**(भाषा)** जिस का पहला चौथा सातवां दशवां और ग्यारहवां अक्षर गुरु हो अतएव एक एक चरण तीन भगण और

---

१ स्वार्थिकः कप्रत्ययोऽत्र।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दो गुरुओं से बनता हो उसे **दोधकवृत्त** कहते हैं। इसके प्रति-चरण की स्वरसंख्या--(SIISIISIISS) इस प्रकार है ॥१६॥

इन्द्रवज्रा

**अत्याहृतायां कविभिः प्रसिद्धैः,**
**प्रत्यङ्घ्रि यस्यां ततजा गयुग्मम् ।**
**बाणै रसैर्लब्धविरामयोगां,**
**तामिन्द्रवज्रां कथयन्ति धीराः ॥१७॥**

**(अन्वयः)** *प्रसिद्धैः कविभिः अत्याहृतायां यस्यां प्रत्यङ्घ्रि ततजाः गयुग्मम्, बाणैः रसैः लब्धविरामयोगां तां धीरा-इन्द्रवज्रां कथयन्ति ॥*

**(टीका)** महद्भिः कविभिरतिशयेनाऽऽदृतायां यस्यां प्रति-चरणं ततजा अर्थात् तगण-तगण-जगणास्ततो गुरुद्वयं च स्युः आदितः पञ्चभिस्ततोऽग्रे च षड्भिर्वर्णैः प्राप्तविश्रमां तां धीरा-**इन्द्रवज्रां** कथयन्ति। अत्र प्रतिचरणम् (SSISSIISISS) इत्येकादश स्वरवर्णाः ।

**(प्रति०) प्रत्यङ्घ्रि**=*प्रतिचरणम्* । **बाणैः**=*पञ्चभिः* । **रसैः**=*षड्भिः* । **लब्धविरामयोगां**=*प्राप्तविश्रामसम्बन्धाम्* ।

**(भाषा)** प्रसिद्ध कवियों के प्रिय जिस छन्द के प्रत्येक चरण में तगण तगण जगण और दो गुरु हों, तथा पहले से लेकर पाँचवें एवं सातवें से लेकर छठे अक्षर पर विश्राम हो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उसे **इन्द्रवज्रा** कहते हैं । इसके प्रत्येक चरण में (ऽऽ।ऽऽ-।।ऽ।ऽऽ) ऐसे स्वरवर्ण चिह्न होते हैं ॥ १७ ॥

उपेन्द्रवज्रा.

**इहैव पादाऽऽदिमलाघवेन,**
**तथा विरामे जतजैर्गुरुभ्याम् ।**
**उपेन्द्रवज्रां जिनपादपद्म,-**
**स्तवेच्छवे साधु वदन्ति सन्तः॥१८॥**

**(अन्वयः)** *सन्तः इहैव ततजैर्गुरुभ्यां पादाऽऽदिमलाघवेन तथाविरामे जिनपादपद्मस्तवेच्छवे उपेन्द्रवज्रां साधु वदन्ति ।*

**(टीका)** विद्वांसः इहैवेन्द्रवज्रायां प्रतिपादं जत-जगणानां गुरुद्वयस्य च समावेशेन चरणाऽऽद्याऽक्षराणि लघूकृत्य पूर्ववद्विश्रामे कृते सति जिनपदकमलयुगलस्तुतिमिच्छते जनाय (जिनचरणकमलस्तावकजनार्थम्) **उपेन्द्रवज्रां** सम्यग् वदन्ति ॥

**(प्रति०) इह**=*इन्द्रवज्रायाम्* । **पादादिमलाघवेन**=*चरणप्रथमाक्षरलघुत्वेन* । **तथाविरामे**=*पूर्ववद्विश्रामे* । **साधु**=*सम्यक्* । **सन्तः**=*विद्वांसः* ॥

**(भाषा)** इसी इन्द्रवज्रा के प्रत्येक चरण के प्रथम अक्षर को लघु करने से **उपेन्द्रवज्रा** छन्द बनता है, विश्राम इसमें भी पहले की भाँति ही समझना चाहिये, इस का एक एक चरण जगण तगण जगण और दो गुरुओं से बनता है अत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एव इस के प्रत्येक चरण में (ISISSIISISS) इस प्रकार स्वर-न्यास होता है ॥१८॥

### उपजाति.

**यत्रेन्द्रवज्राऽऽद्य-तृतीययोः स्या-,**
**दुपेन्द्रवज्रायुगतुर्ययोश्च ।**
**छन्दोविदः कोविदकञ्जसूर्या-,**
**ब्रुवन्ति विज्ञा उपजातिमेनाम् ॥ १९ ॥**

**(अन्वयः)** *यत्र आद्यतृतीययोः इन्द्रवज्रा, युगतुर्ययोश्च उपेन्द्रवज्रा स्यात्, कोविदकञ्जसूर्याश्छन्दोविदो विज्ञा एनाम् उपजातिं ब्रुवन्ति ॥*

**(टीका)** यस्यां प्रथम-तृतीययोः पादयोरिन्द्रवज्रायाः तथा द्वितीयचतुर्थयोस्तयोरुपेन्द्रवज्राया लक्षणं स्यात्, छन्दः-शास्त्रवेत्तारः पण्डितकुलकमलभास्करा विद्वांसस्ता**मुपजातिं** कथयन्ति ॥

**(प्रति०) विज्ञाः=***विद्वांसः* । **एनां=***ताम्* । *व्याख्यातानीतराणि* ।

**(भाषा)** जिस के पहले तथा तीसरे चरण में इन्द्रवज्रा के, और दूसरे तथा चौथे चरण में उपेन्द्रवज्रा के सभी लक्षण

---

१ यद्यपि युग्मं तु युगलं युगमिति कोषे युगशब्दस्य द्वित्वसंख्यावाचकत्वमस्ति, तथापि छन्दःशास्त्रेऽत्रास्यापि तुर्यादिशब्दवत्पूरणान्तार्थबोधकत्वं सर्वजनीनम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हों उस को **उपजाति** कहते हैं । इस का स्वरविचार स्वयं समझलेना चाहिये ॥१९॥

आख्यानिकी.

**आख्यानिकी कैश्चिदुदाहृताऽसौ,**
**यदीन्द्रवज्राचरणेन पूर्वः ।**
**उपेन्द्रवज्राचरणैस्त्रयोऽन्ये,**
**भवन्ति पादाः क्रमभेदभद्राः ॥२०॥**

**(अन्वयः)** *कैश्चित् असौ आख्यानिकी उदाहृता, यदि पूर्वः इन्द्रवज्राचरणेन, अन्ये त्रयः पादाः उपेन्द्रवज्राचरणैः क्रमभेदभद्राः भवन्ति ॥*

**(टीका)** कैश्चित् कविभिरसावुपजातिस्तदा **आख्यानिकी** निर्दिष्टा, यदि प्रथमः पाद इन्द्रवज्राचरणेन, **अन्ये त्रयः** पादा उपेन्द्रवज्राचरणैः कृत्वा पूर्वोक्तक्रमाद् **भेदेन भद्राः**= सुभगा भवन्ति ॥

**(प्रति०) उदाहृता**= निर्दिष्टा । **असौ**= उपजातिः । **इन्द्रवज्राचरणेन**= इन्द्रवज्राचरणग्रहणेन । स्पष्टमन्यद्व्याख्यातं च ॥

**(भाषा)** यदि केवल प्रथम चरण में इन्द्रवज्रा के, और शेष चरणों में उपेन्द्रवज्रा के लक्षण हों तो इसी उपजाति को कई एक कवि **आख्यानिकी** कहते हैं ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रथोद्धता

**यत्र रान्नरलगाः क्रमादमी,**
**विश्रमो भवति वाजितुर्ययोः।**
**तामवेत कविता-लता-फल-**
**स्वादि-कोविद-मतां रथोद्धताम् ॥२१॥**

**(अन्वयः)** *यत्र रात् न-र-ल-गाः अमी क्रमात्, वाजि-तुर्ययोः विश्रमः भवति, कविता-लता-फल-स्वादि-कोविद-मतां तां रथोद्धताम् अवेत ।*

**(टीका)** यस्यां रगणात्परं नगणरगणौ लघुर्गुरुश्च, इत्यमी क्रमेण भवन्ति, सप्तमे सप्तमे चतुर्थे चतुर्थे चाक्षरे यतिर्भवति, कविता-लता-फलानां स्वादिनोऽर्थात् काव्यमर्मिका ये कोविदाः= पण्डितास्तेषां संमतां तां **रथोद्धता** मवगच्छत। अत्र प्रतिपादं- (ऽ।ऽ।।।ऽ।ऽ।ऽ) इत्येकादश स्वरवर्णाः ॥

**(प्रति०) रात्**= रगणात् । **न-र-ल-गाः**= नगण-रगण-लघु-गुरवः । **वाजितुर्ययोः**=सप्तमचतुर्थयोः । **अवेत**= अवगच्छत ।

**(भाषा)** जिस के प्रत्येक चरण में रगण नगण रगण के अनन्तर एक लघु तथा एक गुरु हो और सातवें तथा चरण के अन्तिम अक्षर पर विश्राम हो उसे **रथोद्धता** छन्द जानो । इस के प्रति चरण में-(ऽ।ऽ।।।ऽ।ऽ।ऽ) इस प्रकार स्वर चिह्न होते हैं ॥ २१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वागता

**अक्षरं गुरु भवेद्दशमं तु,**
**व्यत्ययेन नवमं लघु यत्र ।**
**पूर्ववद्यतिमती प्रथिता सा,**
**स्वागतेति कवयः कथयन्ति ॥ २२ ॥**

**(अन्वयः)** *यत्र तु व्यत्ययेन नवममक्षरं लघु दशमं गुरु भवेत्. पूर्ववत् यतिमती प्रथिता सा स्वागता इति कवयः कथयन्ति ॥*

**(टीका)** यस्या पुनः पूर्वस्मात् वैपरीत्येन नवममक्षरं लघु दशमं गुरुः भवेत्, पूर्ववदेव सप्तमचतुर्थाक्षरेषु यतियुक्ता ख्याता सा **स्वागता** इति पण्डिताः कथयन्ति ॥

**(प्रति०)** **तु**= पुनः । **व्यत्ययेन**= पूर्वोक्तवैलक्षण्येन । **पूर्ववत्**= रथोद्धतावत् । **यतिमती**= यतियुक्ता । **प्रथिता**= ख्याता ॥

**(भाषा)** जिस के प्रत्येक चरण में नववाँ अक्षर लघु और दशवाँ गुरु हो, तथा रथोद्धता के समान विश्राम हो उसे **स्वागता** कहते हैं । इस के प्रत्येक चरण में गुरु-लघु-न्यास इस प्रकार हैं – ( ऽ।ऽ।।।ऽ।।ऽऽ ) ॥ २२ ॥

तोटक

**सकलाक्षरणाः सगणै रचिता,-**
**विरतिश्च तथा रसयोरुदिता ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**रचनानिपुणैः कविभिः कलितं,**
**किल तोटकवृत्तमिदं ललितम्॥ २३॥**

**(अन्वय:)** सकलाः चरणाः सगणैः रचिताः, तथा विरतिश्च रसयोः उदिता, ललितमिदं रचनानिपुणैः कविभिः किल तोटकवृत्तं कलितम्॥

**(टीका)** चत्वारश्चरणाः सगणैः रचिताः स्युः (चतुर्भिश्चतुर्भिः सगणैरेकैकस्य पादस्य निर्मितेः) तथा विरामश्च प्रतिपादमादितः षष्ठे षष्ठे सप्तमाद्य षष्ठे २ वर्णे प्रादुर्भवेत्, तदिदं निश्चितं सर्वजनमनोहरं रचनाकुशलैः कविभिः **तोटकवृत्तं** कलितं= निरूपितम्। अत्र (॥ऽ॥ऽ॥ऽ॥ऽ) इत्येवं प्रतिपादं स्वरवर्णक्रमः॥

**(प्रति०) विरतिः**= विरामः। **रसयोः**= षष्ठे षष्ठे। **उदिता**= प्रादुर्भूता। **रचनानिपुणैः**= प्रबन्धचतुरैः। **किल**= निश्चितम्। **ललितम्**= मनोहरम्॥

**(भाषा)** जिस के प्रत्येक चरण में चार चार सगण हों तथा छठे छठे अक्षर पर विश्राम हो उसको कविलोग **तोटकवृत्त** कहते हैं। अत एव इस में-(॥ऽ॥ऽ॥ऽ॥ऽ) इस प्रकार प्रत्येक चरण का स्वरवर्णन्यास होता है॥ २३॥

**प्रमिताक्षरा।**

**गुरु पञ्चमं यदि भवेल्लघु चेद्,-**
**रससंख्यकं पुनरिहैव तदा।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**प्रमिताक्षरां सजससै रुचिरां,**
**निगदन्ति काव्य-कमल-भ्रमराः ॥२४॥**

**(अन्वयः)** यदि चेत् पुनः इहैव पञ्चमं गुरु रससङ्ख्यकं लघु भवेत्, तदा काव्यकमलभ्रमराः सजससैः रुचिरां प्रमिताक्षरां निगदन्ति ॥

**(टीका)** यदि चेत् पुनरिहैव तोटके सर्वपादेषु पञ्चममक्षरं गुरु षष्ठं लघु भवेत् तदा सगण-जगण-सगण-सगणैः शोभनां काव्यकमल-भ्रमरायमाणाः पण्डिताः **प्रमिताक्षरां** कथयन्ति । अत्र पादे पादे— ( ॥S।S॥।S॥S ) इत्येवं द्वादश स्वरवर्णा बोध्याः ॥

**(प्रति०) रससङ्ख्यकं**= षष्ठम् । **रुचिरां**= शोभनाम् । **निगदन्ति**= कथयन्ति । स्फुटमन्यत् ।

**(भाषा)** जिस के एक एक चरण में सगण जगण सगण सगण होने के कारण पांचवाँ अक्षर गुरु तथा छठा लघु हो और शेष अक्षरों का न्यास तोटक के समान हो उसे **प्रमिताक्षरा** छन्द कहते हैं । इस के प्रति चरण का स्वरन्यासक्रम—(॥S।S॥।S॥S ) इस प्रकार है ॥ २४ ॥

भुजङ्गप्रयात

**चतुर्भिर्यकारैरुपन्यस्तपादे,**
**यतिः षष्ठषष्ठाक्षरे चेति यस्मिन् ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भुजङ्गस्य गत्या पदन्यासहेतो-,**
**भुजङ्गप्रयातं सुधीभिस्तदुक्तम् ॥ २५ ॥**

**(अन्वय:)** *चतुर्भिर्यकारैः उपन्यस्तपादे यस्मिन् षष्ठषष्ठाक्षरेषु यतिः एति तत् भुजङ्गस्य गत्या पदन्यासहेतोः सुधीभिः भुजङ्गप्रयातम् उक्तम् ॥*

**(टीका)** चतुर्भिश्चतुर्भिर्यगणैरुपन्यस्ताः= निर्मिताः पादा यस्य तथाभूते यस्मिन् प्रतिपादं षष्ठषष्ठाक्षरेषु षष्ठेषु षष्ठेष्वक्षरेषु यतिः=विश्रान्तिः एति=आगच्छति तद् भुजङ्गस्य=सर्पस्य गत्या=चालेन पदानां=शब्दानां न्यासाद्धेतोर्विद्वद्भिः **भुजङ्गप्रयात** मुक्तम् अत्र प्रतिपादं—( ।SS।SS।SS।SS ) इत्येवं स्वरवर्णक्रमः ॥

**(प्रति०) यकारैः**=यगणैः । स्पष्टमितरत् ॥

**(भाषा)** जिस के प्रत्येक चरण में चार चार यगण हों और छठे छठे अक्षर पर विश्राम हो उसको **भुजङ्गप्रयात** छन्द कहते हैं। इसके एक एक चरण के स्वरचिह्न— (।SS।SS।SS।SS) इस प्रकार हैं ॥ २५ ॥

जलोद्धतगति

**यदि त्रिकचतुष्टयं ज-स-ज-सैः,**
**क्रमेण चरणाः श्रयन्ति सकलाः ।**
**मता कविजनालिनामथ रसै-,**
**रसैः कृतयतिर्जलोद्धतगतिः ॥ २६ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(अन्वयः)** यदि सकलाः चरणाः क्रमेण ज-स-ज-सैः त्रिकचतुष्टयं श्रयन्ति अथ रसैः रसैः कृतयतिः कविजनालिनां मता जलोद्धतगतिः ॥

**(टीका)** यदि सर्वे चरणाः क्रमेण= क्रमशः एकैकश इति यावत् ( प्रतिपादमित्यर्थात् ) जगण-सगण जगण-सगणैर्हेतुभिस्त्रयाणां (स्वराणां) सङ्ख्यास्त्रिकाणि तेषां चतुष्टयं= गणचतुष्टयमित्यर्थः श्रयन्ति=प्राप्नुवन्ति तदा रसैः रसैः= षड्भि. षड्भिः कृता= विहिता यतिः= विश्रामो यस्यां सा तथाभूता कविजना अलन्ति= भूषयन्ति ये तच्छीलाः कविजनालिनस्तेषां सत्कवीनामिति यावत् मता= सत्कविभिर्मान्येत्यर्थः **जलोद्धतगतिः** एतन्नामकं छन्दो भवतीति शेषः । अत्र प्रतिचरणम् (।S।।।S।S।।।S) इति स्वरन्यासो बोध्यः ॥

**(प्रति०)** **अथ**= तदा । व्याख्याता अन्ये ॥

**(भाषा)** जिस के प्रत्येक चरण में जगण सगण जगण सगण हों और छठे छठे अक्षर पर विश्राम हो उसे **जलोद्धतगति** नामक छन्द कहते हैं, अत एव इस के एक एक चरण में— (।S।।।S।S।।।S) इस प्रकार स्वरवर्ण समझना चाहिये ॥२६॥

द्रुतविलम्बित

**गुरु चतुर्थमुदञ्चति सप्तमं,**
**दशम-मन्तिमकं च यदाऽक्षरम् ।**

(१) स्वार्थिकः कः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**न-भ-भ-रैः प्रतिपादमुदाहृतं,**
**द्रुतविलम्बितवृत्तमदस्तदा ॥ २७ ॥**

(**अन्वयः**) यदा चतुर्थं सप्तमं दशमम् अन्तिमकं च अक्षरं गुरु उदञ्चति, तदा [1]प्रतिपादं न-भ-भ-रैः उदाहृतम् अदः द्रुतविलम्बितवृत्तम् ॥

(**टीका**) स्पष्टोऽर्थः । अत्र प्रतिपादम्— ( ।।।ऽ।।ऽ।।ऽ।ऽ) इत्ययं स्वरवर्णक्रमो द्रष्टव्यः ॥

(**प्रति०**) **उदञ्चति**= समापतति (सम्भवति)। **अन्तिमकम्**= अन्तिमम् । न-भ-भ-रैः नगण-भगण-भगण-रगणैः । **उदाहृतम्**= निर्दिष्टम् । **अदः**= एतत् ॥

(**भाषा**) नगण भगण भगण और रगण से प्रत्येक चरण बनने के कारण जिस के एक एक चरण में चौथा सातवाँ दशवाँ तथा बारहवाँ अक्षर गुरु हो उस को **द्रुतविलम्बित** छन्द कहते हैं, अत एव इस के प्रत्येक चरण में— (।।।ऽ।।ऽ।।ऽ।ऽ) ऐसे स्वरचिह्न माने गये हैं ॥ २७ ॥

हरिणीप्लुता

**प्रथमं प्रथमे च तृतीयके,**
**न यदि चेच्चरणेऽक्षरमाहितम् ।**
**कवयो ब्रुवते हरिणीप्लुतां,**
**द्रुतविलम्बितमेव तदाहृताम् ॥ २८॥**

---

(१) एवमिहापि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(अन्वयः)** *यदि चेत् प्रथमे तृतीयके च चरणे प्रथमम् अक्षरं न आहितम्, तदा कवयः द्रुतविलम्बितमेव आदृतां हरिणीप्लुतां ब्रुवते ।*

**(टीका)** यदि चेद् द्रुतविलम्बितस्य प्रथमे तथा तृतीये चरणे प्रथममक्षरं न आहितम्= नोपात्तं (न पठितं) स्यादर्थात् प्रथम-तृतीयपादयोराद्यमक्षरमनुक्त्वा यदि द्रुतविलम्बितं पठ्यते तदैतद्द्रुतविलम्बितमेव कवयः प्रशस्तां **हरिणीप्लुतां** वदन्ति ॥

**(प्रति०) तृतीयके=** तृतीये । **ब्रुवते=** वदन्ति । **आदृतां=** प्रशस्ताम् । व्याहृतान्यन्यानि ॥

**(भाषा)** यदि द्रुतविलम्बित छन्द के पहले तथा तीसरे चरण से पहला अक्षर हटा दिया जाय तो उसको **हरिणीप्लुता** छन्द कहते हैं ॥ २८ ॥

### वंशस्थ

**चतुर्षु पादेषु जतौ ज-रौ यदा,**
**यतिश्च बाणेषु तुरङ्गमेष्वपि ।**
**कवीन्द्रचूडामणिचुम्बिताङ्घ्रिभि-**
**स्तदा तु वंशस्थमुदीर्यते बुधैः ॥ २९ ॥**

**(अन्वयः)** *यदा चतुर्षु पादेषु ज-तौ ज-रौ, बाणेषु तुरङ्गमेष्वपि यतिश्च, तदा तु कवीन्द्रचूडामणिचुम्बिताङ्घ्रिभिः बुधैः वंशस्थम् उदीर्यते ॥*

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(टीका)** यदा चतुर्षु पादेषु जगण-तगण-जगण-रगणा भवन्त्यर्थादेतैश्चतुर्भिर्गणैः प्रत्येकपादपूर्त्तिर्भवति, तथा आदितः पञ्चमे पञ्चमे तद्वपरितश्च सप्तमे सप्तमेऽक्षरे चेद्यतिस्तदा कवीन्द्र-जन-मान्यैर्विद्वद्भिः **वंशस्थ**—नामकं वृत्तमुच्यते। अत्र प्रतिपादम्-( ।S।SS।।S।S।S ) इति स्वरन्यासः ।

**(प्रति०)** **बाणेषु=** पञ्चसु । **तुरङ्गमेषु=** सप्तसु । **उदीर्यते=** उच्यते । स्पष्टं शिष्टम् ॥

**(भाषा)** जिसके प्रत्येक चरण में जगण तगण जगण और रगण हों तथा पांचवें और सातवें अक्षर पर विश्राम हो उसको कविलोग **वंशस्थ** नामक छन्द कहते हैं। इस के एक एक चरण में—(।S।SS।।S।S।S) ऐसे स्वर चिह्न होते हैं ॥ २६ ॥

इन्द्रवंशा

**वंशस्थपादेष्वखिलेषु ते यथा,**
**वर्णा भवन्ति प्रथमे द्विमात्रिकाः।**
**सत्काव्यरत्नाकरमन्थनोद्धुरा-**
**स्तामिन्द्रवंशां ब्रुवते कवीश्वराः॥३०॥**

**(अन्वयः)** *यथा अखिलेषु वंशस्थपादेषु ते प्रथमे वर्णा द्विमात्रिकाः भवन्ति, सत्काव्यरत्नाकरमन्थनोद्धुराः कवीश्वराः ताम् इन्द्रवंशां ब्रुवते ॥*

**(टीका)** अर्थः प्रस्फुट एव ॥

(१) ' दण्डेन घट ' इति वत्तृतीया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(प्रति०) ते**= *वंशस्थोक्ताः* **प्रथमे**=*आदिमाः । सत्का-* **व्यरत्नाकरमन्थनोद्धुराः**= *सत्काव्यरूपसमुद्रमथनयत्न-* *वन्तः ।* **ब्रुवते**= *कथयन्ति ॥*

**(भाषा)** यदि वंशस्थ छन्द के प्रत्येक चरण का पहला अक्षर गुरु हो तो **इन्द्रवंशा** छन्द कहलाता है ॥ ३० ॥

प्रभावती

**तुर्ये तथा प्रतिचरणेऽन्तिमेऽक्षरे,**
**यस्यां भवेद्विरतिरतीव सुन्दरी ।**
**मान्या स्मृता त-भ-स-ज-गैः प्रभावती,**
**सेयं महाकविकुलचक्रवर्त्तिभिः॥३१॥**

**(अन्वयः)** *यस्यां प्रतिचरणे तुर्ये तथा अन्तिमेऽक्षरे अतीव सुन्दरी विरतिः भवेत्, त-भ-स-ज-गैः सेयं प्रभावती महाकवि-कुल-चक्रवर्त्तिभिः मान्या स्मृता ॥*

**(टीका)** यस्यां प्रतिचरणविषये चतुर्थे एवमन्तिमेऽक्षरे श्रवणसुखाऽऽवहा यतिर्भवेत्, तगण-भगण-सगण-जगणैर्गुरुणा[१] चोपलक्षिता (युक्ता) सेयं **प्रभावती** महाकविजनमान्यैः पण्डित-वर्यैर्मान्या=माननीया स्मृता=निश्चितेत्यर्थः । अत्र प्रतिचरणम्-(ऽऽ|ऽ|||ऽ|ऽ|ऽ) इत्येष स्वरवर्णन्यासः ॥

**(प्रति०) तुर्ये**= *चतुर्थे* । **प्रतिचरणे**= *प्रतिपादम् ।*

---

(१). ' इत्थम्भूतलक्षणे ' इत्यनेन तृतीयाऽत्र , एवमीदृशस्थलेष्व-न्यत्रापि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अतीव=** अत्यन्तम् । **सुन्दरी=** सुश्रवा । अथशिष्टम्-विशिष्टम् ॥

**(भाषा)** जिस के प्रति चरण में तगण भगण सगण जगण और एक गुरु हों, तथा चौथे एवम् अन्तिम अक्षर पर विश्राम हो उस को **प्रभावती** छन्द कहते हैं । इस के प्रत्येक चरण के स्वरचिह्न (ऽऽ।ऽ।।।।ऽ।ऽ।ऽ) ऐसे हैं ॥ ३१ ॥

प्रहर्षिणी

**यत्राऽऽद्यं त्रिकमभितोऽष्टमं नवान्त्यं,**
**पादान्त्यं द्विकमपि निश्चितं गुरु स्यात् ।**
**विश्रामस्त्रिभिरथ दिग्भिरर्थनीयो,-**
**व्याख्याता म-न-ज-र-गैः प्रहर्षिणी सा ॥ ३२ ॥**

**(अन्वयः)** *यत्र अभितः आद्यं त्रिकम् अष्टमं नवान्त्यं पादान्त्यं द्विकमपि गुरु निश्चितं स्यात्, अथ त्रिभिः दिग्भिः विश्रामः अर्थनीयः, म-न-ज-र-गैः सा प्रहर्षिणी व्याख्याता ॥*

**(टीका)** यस्यां सर्वपादेषु आद्यत्रयम् अष्टमं दशमं चरणान्त्य-द्वयं चाक्षरं गुरु नियतं स्यात्, तथा आदितस्त्रिभिश्चतुर्दशभिश्च विरामो-ऽभिलषणीयः, मगण-नगण-जगण-रगण-गुरुभिरुपलक्षिता सा **प्रहर्षिणी** प्रोक्ता । अत्र प्रतिचरणं क्रमेण (ऽऽऽ।।।।ऽ।ऽ।ऽऽ) इति स्वरचिह्नन्यासः ॥

**(प्रति०) आद्यम्=** प्रथमम् । **त्रिकं=** त्रितयम् । **अभितः=** सर्वपादेषु । **नवान्त्यं=** दशमम् । **द्विकं=** द्वयम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निश्चितं**= नियतम् । **दिग्भिः**= दशभिः । **अर्थनीयः**= **अभिलषणीयः** । अन्यद्व्याख्यातम् ॥

**(भाषा)** जिसके प्रत्येक चरण में आदि के तीन और आठवाँ तथा दसवाँ एवम् चरण के अन्तिम दो अक्षर गुरु हों, तथा तीसरे और अन्तिम अक्षर पर विश्राम हो, मगण-नगण-जगण रगण और एक गुरु से युक्त वह छन्द **प्रहर्षिणी** नामक है। इस के प्रत्येक चरण में ( SSS||||S|S|SS ) इतने स्वरवर्ण चिह्न होते हैं ॥ ३२ ॥

वसन्ततिलका

**आद्यं द्विकं गुरु तथा परतश्चतुर्थं,**
**यत्राष्टमं च दशमान्तिममन्त्ययुग्मम् ।**
**पादा भवन्ति त-भ-जै ज-ग-गैः कवीनां,**
**रम्या वसन्ततिलका तिलकायते सा ।३३।**

**(अन्वयः)** यत्र आद्यं द्विकं तथा परतः चतुर्थम् अष्टमं दशमान्तिमम् अन्त्ययुग्मं च गुरु, त-भ-जैः ज-ग-गैः पादा भवन्ति सा रम्या वसन्ततिलका कवीनां तिलकायते ॥

**(टीका)** यस्यां प्रतिपादमाद्यद्वयं तथा तदुत्तरं चतुर्थमष्टम-मेकादशमन्त्यद्वयं चाक्षरं गुरु भवति, अतएव तगण-भगण-जगण-जगण-गुरुद्वयैः पादा भवन्ति सा रमणीया **वसन्ततिलका** कवीनां तिलकमिव प्रतिभाति। अत्र प्रतिचरणम्-(SS|S|||S||-S|SS) इति स्वरवर्णन्यासः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(प्रति०) परतः=** अनन्तरम् । **दशमान्तिमम्=** एकादशम् । **अन्त्ययुग्मम्=** त्रयोदशचतुर्दशे । स्फुटमन्यत् ॥

**(भाषा)** तगण भगण जगण जगण और दो गुरुओं से युक्त होने के कारण जिस के प्रत्येक चरण में आठवें और छठे अक्षर पर विश्राम हो तथा आदि के दो और चौथा आठवाँ ग्यारहवाँ एवम् अन्तिम दो अक्षर गुरु हों वह **वसन्ततिलका** छन्द है। इसके प्रत्येक चरण में स्वरन्यास (SS|S|||S||S|SS) इस प्रकार जानना चाहिये ॥ ३३ ॥

मालिनी

**प्रतिचरणमुदीर्यं षट्कमाद्यं लघु स्या,–**
**दपि च दशममेवं द्वादशान्त्यं च यस्याः ।**
**वसुभिरथ तुरङ्गैर्लब्धविश्रामयोगा,–**
**न-न-म-य-य-युता सा मालिनी सुप्रसिद्धा ॥**

**(अन्वयः)** *यस्याः प्रतिचरणम् आद्यं षट्कम् अपि च दशमम् एवं द्वादशान्त्यं च लघु उदीर्यं स्यात्, वसुभिः अथ तुरङ्गैः लब्धविश्रामयोगा न-न-म-य-य-युता सा मालिनी सुप्रसिद्धा ॥*

**(टीका)** यस्याः प्रतिचरणमादितः षट्कं किञ्च दशममेवं द्वादशान्त्यमर्थात् त्रयोदशं चाक्षरं लघु उच्चार्यं स्यात्, आदितोऽ–ष्टाभिस्तदग्रे सप्तभिश्चाक्षरैर्विश्रान्तिमती नगण-नगण-मगण-यगण यगणैर्युक्ता सा **मालिनी** ख्याता । अत्र प्रतिचरणम् (||||||SS-S|SS|SS) इत्येवमवगन्तव्यो न्यासः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(प्रति०) उदीर्यम्=** उच्चारणीयम् । **षट्कम्=** षट् । **अपिच=**किञ्च । **वसुभिः=** अष्टाभिः । **तुरङ्गैः=** सप्तभिः । स्पष्टमवशिष्टम् ॥

**(भाषा)** जिसके प्रत्येक चरण में दो नगण एक मगण और दो यगण हों अत एव आदि के छः एवं दसवाँ और तेरहवाँ अक्षर लघु हों उसे **मालिनी** छन्द कहते हैं । इस के आठवें और सातवें अक्षर पर विश्राम होता है । स्वर वर्णों के चिह्न यहां पर (||||||SSS|SS|SS) इस प्रकार हैं ॥ ३४ ॥

हरिणी

**दधति लघुतां पूर्वे पञ्च त्रयोदश-तत्परा-**
**वपि च दशमान्त्योपान्त्यौ द्वौ न्समाद्रसलाद्गुरौ ।**
**भवति विरतिः षड्भिस्तुर्यैर्हयैश्च यदा तदा,-**
**कविकुल-शिरोरत्नैः प्रत्नैर्बुधैर्हरिणी स्मृता ॥**

**(अन्वयः)** यदा न्-स-मात् र-स-लात् गुरौ पूर्वे पञ्च त्रयोदश-तत्परौ अपि च द्वौ दशमान्त्योपान्त्यौ लघुतां दधति, विरतिश्च षड्भिस्तुर्यैर्हयैर्भवति, तदा कविकुलशिरोरत्नैः प्रत्नैः बुधैः हरिणी स्मृता ॥

**(टीका)** यदा नगण सगणाभ्यां परतो मगण-रगण-सगण लघवस्ततः परे गुरौ सति प्रतिचरणमाद्याः पञ्च वर्णास्त्रयोदश-श्चतुर्दशस्तथैकादशः षोडशश्च लघुतां दधति= लघवो भवन्ति, आद्यात्षड्भिस्ततश्चतुर्भिस्ततः सप्तभिश्च वर्णैर्विरामो भवति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदा कवि-कुल-शिरोरत्नैः= महामान्यैः प्राचीनैर्विद्वद्भिर्**हरिणी** प्रोक्ता । अत्र प्रतिचरणम् ( |||||SSSSS|S||S|S) इत्यस्ति क्रमो न्यासस्य ॥

**(प्रति०) पूर्वं**= आद्याः । **त्रयोदश-तत्परौ**= त्रयोदश-चतुर्दशौ । **दशमान्त्योपान्त्यौ**=एकादश-षोडशौ । **लोकैः**= सप्तभिः । **तुर्यैः**= चतुर्थैः । **रसैः**=षड्भिः । **प्रत्नैः**= प्राचीनैः । **स्मृता**= सम्मता (प्रोक्ता) समानमन्यत् ॥

**(भाषा)** जिस के प्रत्येक चरण के आदि के पांच, और ग्यारहवाँ तेरहवाँ चौदहवाँ तथा सोलहवाँ अक्षर लघु हों अत एव नगण सगण मगण रगण सगण एक लघु और एक गुरु से चरण की पूर्ति होती हो, तथा छठे दसवें और अन्तिम अक्षर पर विश्राम होता हो उस को कविलोग **हरिणी** छन्द कहते हैं। इस के प्रत्येक चरण के स्वर चिह्न- ( |||||SSSSS|S||S|S ) इस प्रकार हैं ॥ ३५ ॥

## शिखरिणी

**लघुः पूर्वो यस्यामनुपतति षष्ठाच्च परत,-**
**स्तथा, पञ्चोपान्त्यास्त्रय इति च वर्णाः प्रतिपदम्।**
**यतिः षड्भी रुद्रैः कविजन-समाराधितधियां,**
**महामान्या गान्तैर्य-म-न-स-भ-लैः सा शिखरिणी॥**

**(अन्वयः)** *यस्यां प्रतिपदम् पूर्वः लघुः अनुपतति, षष्ठात्परतः पञ्च उपान्त्यास्त्रय इति वर्णाश्च तथा, षड्भिः रुद्रैः यतिः,-*

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



*गान्तैः य-म-न-स-भ-लैः कवि-जन-समाराधितधियां महामान्या सा शिखरिणी ॥*

**(टीका)** यस्यां प्रतिचरणं प्रथमो वर्णो लघुरायाति, एवं षष्ठात्परतोऽर्थात् सप्तमादारभ्य पञ्च, उपान्त्याः= चतुर्दश-पञ्चदश-षोड़शाश्च इत्येते वर्णाश्च लघव आयान्ति विरामश्च प्रथमं षड्भिस्तत एकादशभिर्भवति यगण-मगण-नगण-सगण-भगणैर्लघु-गुरुभ्यां चोपलक्षिता कविवरैः समाराधिता= धन्यवादपात्रीकृता धीः= बुद्धिर्येषां तेषां महाकवीनामिति यावत् महामान्या= अतिमाननीया सा **शिखरिणी**त्यर्थः । अत्र ( ।SSSSS।।।।।-SS।।।S ) इति प्रतिपादं स्वरवर्णविन्यासो द्रष्टव्यः ॥

**(प्रति०) अनुपतति=** *आयाति* । **उपान्त्याः=** *अन्त्य-पूर्वस्थाः* । **प्रतिपदम्=** *प्रतिचरणम्* । **रुद्रैः=** *एकादशभिः* । **गान्तैः=** *गुर्वन्तरान्तैः* ॥

**(भाषा)** जिस के प्रत्येक चरण में यगण मगण नगण सगण भगण और लघु रहने के कारण पहला, तथा छठे से लेकर पाँच, एवं चौदहवाँ, पन्द्रहवाँ, और सोलहवाँ अक्षर लघु हो वह **शिखरिणी** छन्द कहलाता है । इसमें छठे और अन्तिम अक्षर पर विश्राम होता है । इस के प्रत्येक चरण के स्वरवर्ण न्यास का क्रम(।SSSSS।।।।।SS।।।S) इस भांति है ।३६।

पृथ्वी

**द्वितीयमथ षष्ठकं गुरु तथाऽष्टमं द्वादशं,**
**सपञ्चदशमन्तिमं यदि चतुर्दशं राजते ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नगग्रहमिताक्षरैः श्रितयतिः कवीन्द्राऽऽदृता,**
**ज-स-ज-स-य-लाद्गुरौ क्षितितलेऽत्र पृथ्वी तदा ॥**

(**अन्वयः**) *यदि द्वितीयम् अथ षष्ठकं तथा अष्टमं द्वादशं चतुर्दशं पञ्चदशम् अन्तिमं गुरु राजते तदा जसाज्जसयलाद्गुरौ नगग्रहमिताक्षरैः श्रितयतिः कवीन्द्राऽऽदृता अत्र क्षितितले पृथ्वी ॥*

(**टीका**) यदि प्रतिचरणं द्वितीयं षष्ठमष्टमं द्वादशं चतुर्दशं पञ्चदशं चरणान्त्यं चाक्षरं गुरु समुल्लसति, तदा जगण-सगणाभ्यां परतो ये जगण-सगण-यगण लघवस्तस्मात्परत्र गुरौ जाते सति अष्टभिर्नवभिश्चाक्षरैः प्राप्तविरामा कविवैरादृता अत्र भूतले पृथ्वी भवतीतिशेषः । अत्र प्रतिपादम् (ISIIISISIIISISSIS) इति स्वर-वर्णविन्यासः ॥

(**प्रति०**) **षष्ठकं**= *षष्ठम्* । **सपञ्चदशम्**= *पञ्चदशसहितम्* । **अन्तिमम्**= *पादान्त्यम्* ।

(**भाषा**) यदि प्रत्येक चरण का दूसरा छठा आठवाँ बारहवाँ चौदहवाँ पन्द्रहवाँ एवं सत्रहवाँ अक्षर गुरु हो और आठवें तथा अन्तिम अक्षर पर विश्राम हो तो उस को **पृथ्वी** छन्द कहते हैं । इस के प्रत्येक चरण में जगण सगण जगण सगण यगण एक लघु और एक गुरु रहते हैं अत एव स्वरचिह्न- (ISIIISISIIISISSIS) इस प्रकार समझना चाहिये ॥ ३७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्दाक्रान्ता

**प्राक्चत्वारस्तदनु गुरुतां चेद्दशैकादशौ द्वौ,-**
**प्राप्तौ वर्णौ प्रतिपदमथ द्वादशान्त्यौ तथाऽन्त्यौ ।**
**तुर्यैः षड्भिस्तदिह तुरगैर्लब्धविश्रामधाम्नीं,**
**मन्दाऽऽक्रान्तां म-भ-न-त त-गाद्वेन गायन्ति धीराः ॥**

**(अन्वयः)** चेत् *प्रतिपदं प्राक् चत्वारस्तदनु दशैकादशौ द्वौ अथ द्वादशान्त्यौ तथा अन्त्यौ वर्णौ गुरुताम्प्राप्तौ, तत् तुर्यैः षड्भिः तुरगैः लब्धविश्रामधाम्नीम् इह धीराः म-भ-न-त-त-गाद्वेन मन्दाऽऽक्रान्तां गायन्ति ॥*

**(टीका)** यदि चेत् प्रतिपादं पूर्वं चत्वारो वर्णास्तत्पश्चाद्दशैकादशौ द्वौ वर्णौ, अनन्तरं द्वादशान्त्यौ= त्रयोदश-चतुर्दशौ, एवमन्त्यौ= षोडश-सप्तदशौ गुरवः स्युः, तदा क्रमेण चतुर्भिः षड्भिः सप्तभिश्च प्राप्तविरामां छन्दःशास्त्रे पण्डिताः मगण-भगण-नगण-तगण-तगणेभ्यः परत्र गुरुभ्यामुपलक्षितां मन्दाऽऽक्रान्तां कथयन्ति । अत्र प्रतिचरणम् ( SSSS।।।।।SS।SS।SS) इति स्वरवर्णचिह्नानि ॥

**(प्रति०) तदनु=** तत्पश्चात् । **प्रतिपदम्=** प्रतिपादम् । **तुरगैः=** सप्तभिः । **तत्=** तदा । **इह=** छन्दःशास्त्रे । **लब्धविश्रामधाम्नीं=** प्राप्तविरामस्थानाम् । **गायन्ति=** भाषन्ते । **धीराः=** पण्डिताः ॥

---

(१) द्वादशस्यान्त्याविति विग्रहः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(भाषा)** जिसके प्रत्येक चरण में पहले के चार और दसवाँ ग्यारहवाँ तेरहवाँ चौदहवाँ एवम् अन्त के दो अक्षर गुरु हों और पहले चार तब छः तथा अन्त में सात अक्षरों से विश्राम हो उस को **मन्दाक्रान्ता** छन्द कहते हैं। इस का प्रत्येक चरण मगण भगण नगण तगण तगण और एक गुरु से बनता है अत एव स्वर चिह्न--( SSSS|||||SS|SS|SS ) इस प्रकार जानना चाहिये॥ ३८ ॥

हंसी

**मन्दाऽऽक्रान्ता,ऽऽद्ययतियुगला,**
**पादे पादे विलसति यदा।**
**छन्दोविद्भिः कविभिरुदिता,**
**सेयं हंसी म-भ-न-गयुता ॥ ३९ ॥**

**(अन्वयः)** *यदा पादे पादे आद्ययतियुगला मन्दाऽऽक्रान्ता विलसति, म-भ-न-गयुता सा इयं छन्दोविद्भिः कविभिः हंसी उदिता ॥*

**(टीका)** मन्दाऽऽक्रान्तायां प्रतिचरणं यतित्रयं तत्र यदा पादे पादे आद्यं यतिद्वयं यस्यां तथाभूताऽर्थात्प्रतिपादमन्त्यभागतः सप्तभिः सप्तभिरक्षरै रहिता मन्दाऽऽक्रान्ता विलसति= विराजते ( अत्र तदेत्यस्य शेषः ) मगण-भगण-नगण-गुरुभिरुपलक्षिता (उपनिबद्धा) छन्दःशास्त्रज्ञैः कविभि **हंसी** प्रोक्ता। अत्र प्रतिचरणम् ( SSSS|||||S ) इति स्वरवर्णन्यासः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(प्रति०) उदिता=** उक्ता । स्पष्टं व्याख्यातञ्चान्यत् ॥

**(भाषा)** यदि मन्दाक्रान्ता के प्रत्येक चरण से अन्तिम सात अक्षर निकाल दिये जायँ तो उसे **हंसी** छन्द कहते हैं। इस के प्रतिचरण में मगण भगण नगण तथा एक गुरु रहते हैं अत एव स्वर चिह्न ( ऽऽऽऽ।।।।।ऽ ) ऐसे होते हैं ॥ ३६ ॥

शार्दूलविक्रीडितम्

**यत्राऽऽद्या गुरवस्त्रयो विनिहिताः षष्ठस्तथैवाष्टमः,**
**किञ्चैकादशतः परे त्रय इतोऽप्यष्टादशाद्यौ परः ।**
**आदित्यैस्तुरगैर्गृहीतविरति श्रेयस्करं श्राविणां,**
**तद्व्यक्तं म-स-ज-स-त-तैःसगुरुभिःशार्दूलविक्रीडितम्**

**(अन्वयः)** *यत्र आद्यास्त्रयः तथैव षष्ठः अष्टमः किञ्च एकादशतः परे त्रयः इतोऽपि-अष्टादशाऽऽद्यौ परः गुरवः विनि-हिताः, आदित्यैः तुरगैः गृहीतविरति श्राविणां श्रेयस्करं सगु-रुभिः म-स-ज-स-त-तैः व्यक्तं तत् शार्दूलविक्रीडितम् ।*

**(टीका)** यस्मिन् प्रतिचरणमाद्यास्त्रयो वर्णाः तथैव षष्ठः अष्टमः एवमेकादशतः परे त्रयः इतोऽपि परेऽष्टादशस्याऽऽद्यौ= षोडशसप्तमौ तथा परः= पादान्त्यः गुरवो विनिहिताः स्युरिति शेषः आदितो द्वादशभिस्त्रयोदशात्सप्तभिश्च प्रासविरामं श्रोतॄणां श्रावयितॄणां च कल्याणकारकं मगण-सगण-जगण-सगण-तगण-

(१) अष्टादशस्याऽऽद्याविति विग्रहः ।

(२) शृण्वन्ति श्रावयन्ति वा तच्छीलं येषामिति ताच्छील्ये णिनिरत्र ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तगणौगुरुणा च व्यक्तम्= उत्पन्नं तत् **शार्दूलविक्रीडितम्** ।
अत्र प्रतिचरणम् ( SSS||S|S|||SSS|SS|S ) इति स्वरवर्ण-
क्रमो ज्ञेयः ॥

**(प्रति०) विनिहिताः**= दत्ताः । **परः**= अन्यः ।
**आदित्यैः**= द्वादशभिः । **तुरगैः**= सप्तभिः । **श्रेयस्करं**=
कल्याणकारकम् । **व्यक्तम्**= उत्पन्नम् ॥

**(भाषा)** जिस के प्रत्येक चरण में आदि के तीन छठा आठवाँ बारहवाँ तेरहवाँ चौदहवाँ सोलहवाँ सत्रहवाँ और उन्नीसवाँ अक्षर गुरु हों, तथा बारहवें और अन्तिम अक्षर पर विश्राम हो उसे **शार्दूलविक्रीडित** छन्द कहते हैं । इस के प्रति चरण में मगण सगण जगण सगण तगण और एक गुरु रहने के कारण स्वर चिह्न-( SSS||S|S|||SSS|SS|S ) इस प्रकार हैं ॥ ४० ॥

स्रग्धरा

**वर्णाश्चत्वार आद्या विजहति लघुतां षष्ठकः सप्तमश्च,**
**प्रत्यङ्घ्रि द्वौ तथाऽन्त्यौ श्रुतिपथललितौ षोडशाद्यौ[1]**
**तदन्त्यौ[2] ।**
**विश्रान्तिर्यत्र दत्ता रसिकजनमुदे सप्तभिः सप्तभिश्च,**
**अश्वेभ्यो यत्रिकेण स्फुटमिह विदिता स्रग्धराऽसौ ध-**
**रायाम् ॥ ४१ ॥**

---

(१) षोडशस्याऽऽद्याविति विग्रहः ।(२) तस्य षोडशस्यान्त्यौ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(अन्वय:)** *यत्र प्रत्यङ्घ्रि आद्याश्चत्वारः षष्ठकः सप्तमश्च तथा श्रुतिपथललितौ द्वावन्त्यौ षोडशाऽऽद्यौ तदन्त्यौ वर्णाः लघुतां विजहति, रसिकजनमुदे सप्तभिः सप्तभिः विश्रान्तिश्च दत्ता, म्रभ्नेभ्यो यत्रिकेण इह धरायां स्फुटं विदिता असौ स्रग्धरा।*

**(टीका)** यस्यां प्रतिचरणमादितश्चत्वार: षष्ठ: सप्तम: तथा सुश्रवौ द्वावन्त्यौ षोडशाऽऽद्यौ=चतुर्दश-पञ्चदशौ तदन्त्यौ= सप्तदशाष्टादशौ इत्येते वर्णा लघुतां त्यजन्ति अर्थाद्गुरवो भवन्ति, तथा रसिकजनानामानन्दाय सप्तभि:सप्तभिर्वर्णैर्विश्रान्तिश्च दत्ता, मगण-रगण-भगण-नगणेभ्य: परस्तात् त्रिभिर्यगणैरस्यां पृथिव्यां स्फुटं विदिताऽसौ **स्रग्धरा** अत्र प्रतिचरणम्–(ऽऽऽऽ।ऽऽ।।।।।।ऽऽ।ऽऽ।ऽऽ ) इत्येवं स्वरवर्णन्यास: ।

(प्रति०) **विजहति=** *त्यजन्ति ।* **प्रत्यङ्घ्रि=** *प्रतिचरणम् ।* **तदन्त्यौ=** *षोडशान्त्यौ ।* **रसिकजनमुदे=** *रसिकजनानन्दाय ।* **विदिता=** *विज्ञाता । स्पष्टं शिष्टम् ॥*

**(भाषा)** जिस के प्रति चरण में आदि के चार, छठा सातवाँ चौदहवाँ पन्द्रहवाँ सत्रहवाँ अठारहवाँ और अन्त के दो अक्षर गुरु हों, तथा सातवें २ अक्षर पर विश्राम हो उस को **स्रग्धरा** छन्द कहते हैं। मगण रगण भगण नगण और तीन यगण से युक्त रहने के कारण इस के प्रत्येक चरण के स्वर चिह्न–( ऽऽऽऽ।ऽऽ।।।।।।ऽऽ।ऽऽ।ऽऽ ) इस प्रकार हैं ॥ ४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पणबन्ध

चत्वारो यदि लघवो वर्णाः,
प्रत्यङ्घ्रि स्युरिह हि मध्यस्थाः ।
बाणैराप्तविरति तद्वृत्तं,
निर्णीतं खलु पणबन्धाऽऽख्यम् ॥४२॥

(**अन्वयः**) इह हि यदि प्रत्यङ्घ्रि मध्यस्थाः चत्वारः वर्णाः लघवः स्युः, बाणैः आप्तविरति तत् वृत्तं खलु पणबन्धाऽऽख्यं निर्णीतम् ॥

(**टीका**) इह= छन्दःशास्त्रे हि यदि प्रतिचरणं दशसु दशस्वक्षरेषु मध्यस्थाश्चत्वारश्चत्वारो वर्णा लघवो भवेयुः तत्= तदा बाणैः= पञ्चभिः= पञ्चभिः= प्राप्ता विरतिः= विरामो येन तथाभूतं वृत्तं खलु= नियमेन **पणबन्धा**ऽऽख्यं निर्णीतम् ॥ अत्र प्रतिपादम्--( SSSIIIISSS ) इति स्वराः ॥

(**प्रति०**) **पणबन्धाऽऽख्यं**= 'पणबन्ध' नामकम् । व्याख्यातानीतराणि ॥

(**भाषा**) यदि प्रत्येक चरण के मध्य के चार चार अक्षर लघु हों और पांचवें पांचवें अक्षर पर विश्राम हो तो उसे **पणबन्ध** छन्द कहते हैं। इस के प्रति चरण के स्वर चिह्न-- ( SSSIIIISSS ) इस प्रकार हैं ॥ ४२ ॥

मत्ता

चत्वारश्चेत्त्रियमितरूपाः,
प्रागन्त्याभ्यां यदि लघवः स्युः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**दीर्घैरन्यैर्विरचितवेषा,**
**मत्ता सैषा म-भ-स-ग-युक्ता ॥ ४३ ॥**

**(अन्वयः)** *यदि चेत् अन्त्याभ्यां प्राक् चत्वारः नियमितरूपाः लघवः स्युः, अन्यैः दीर्घैः विरचितवेषा म-भ-स-गयुक्ता सा एषा 'मत्ता' ॥*

**(टीका)** स्फुटोऽर्थः । अत्र प्रतिचरणम्-( SSSSIIIISS ) इति स्वरन्यासः ॥

**(टि०)** **नियमितरूपाः=** *निर्धारितस्वरूपाः* । **अन्त्याभ्याम्=** पादान्त्यवर्णाभ्याम् । **अन्यैः=** अवशिष्टैः । **विरचितवेषा=** *निबद्धस्वरूपा* । **म-भ-स-गयुक्ता=** *मगण-भगण-सगण-गुरुवर्णविन्यस्ता ॥*

**(भाषा)** जिस के प्रत्येक चरण के अन्तिम दो अक्षरों से पहले के चार २ अक्षर लघु और बाकी सभी अक्षर गुरु हों उस को **मत्ता** छन्द कहते हैं । इस का प्रत्येक चरण मगण भगण सगण और एक गुरु से युक्त रहता है अत एव स्वरचिह्न-( SSSSIIIISS ) इस प्रकार जानना चाहिये ॥ ४३ ॥

मणिगुणनिकर

**प्रतिचरणचरमविनिहितगुरुको-,**
**वसु-तुरग-विरतिमनुसरति तथा ।**

---

(1) विरचितो= निर्मितो वेषः= स्वरूपं यस्याः सा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**न-न-न-न-पर-लघु-लघु-गुरु-चरणो,**
**रमयति यतिमपि मणिगुणनिकरः ॥४४॥**

**(अन्वयः)** *प्रतिचरणचरमविनिहितगुरुकः वसुतुरगविरतिम् अनुसरति तथा; न-न-न-न-पर-लघु-लघु-गुरुचरणः मणिगुणनिकरः यतिमपि रमयति ॥*

**(टीका)** यदि प्रतिचरणं चरमे= अन्ते विनिहितः= कृतः गुरुर्यस्मिंस्तथाभूतः अष्टसु सप्तसु च विरामं प्राप्नोति, तथा= एवम् नगणचतुष्टयात्परो लघुद्वयसहितो गुरुर्येषु तादृशाश्चरणाः= पादा यस्य स **'मणिगुणनिकरः'** यतिं= परित्यक्तसुखदुःखादिभेदभावमपि रमयति= प्रसादयति । अत्र परार्द्धेन कस्याश्चिज्ज्ञातयौवनाया नवोढायाश्चरणगृहीतमणिनूपुरायाः केलीगृहदेहलीमभ्युपेतायाः स्वात्मानं प्रति पतिमनोभावमाकृष्टुं सुरतप्रारम्भे नकारैस्तद्व्यापारं विफलयन्त्याः क्षणे मन्दं क्षणे सत्वरमभिगच्छन्त्याश्चरणस्थमणिगुणनिकरोऽपि व्यज्यते, अत्र पक्षे न न न न परौ= नहि नहि नहि नहीति निषेधबोधकौ लघु-लघू= अतिसत्वरौ ( मेलोत्कण्ठया ) गुरू= मन्दतरौ= लज्जापारवश्येन मन्थरौ चरणौ यस्मिन्नेवम्भूतो **मणिगुणनिकरो** यतिं= जितेन्द्रियमपि रमयतीत्यादिरीत्याऽर्थो बोध्यः । अत्र श्लोके प्रतिचरणम् ( ।।।।।।।।।।।।।।ऽ) इत्येष स्वरन्यासः ।

**(प्रति०) वसु-तुरग-विरतिम्=** *अष्ट-सप्त-विरामम् ।*
**तथा=** *किञ्च । स्पष्टमन्यत् ॥*

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(भाषा)** जिस के प्रत्येक चरण का केवल अन्तिम अक्षर गुरु हो और आठवें तथा अन्तिम अक्षर पर विश्राम हो उसको **मणिगुणनिकर** छन्द कहते हैं। इस के प्रतिचरण में चार नगण दो लघु तथा एक गुरु रहने के कारण स्वरचिह्न— (|||-||||||||||S ) इस प्रकार हैं ॥ ४४ ॥

कुड्मलदन्ती

**या प्रतिपादं शर-रसयामा,**
**काव्यरसज्ञेषु विहितपामा।**
**पण्डितमुख्यैरिह कथिता सा,**
**कुड्मलदन्ती भ-त-न-ग-गाऽऽसा ॥४५॥**

**(अन्वयः)** *या प्रतिपादं शर-रसयामा भ-त-न-ग-गाऽऽसा, काव्यरसज्ञेषु विहितपामा सा पण्डितमुख्यैः इह कुड्मलदन्ती कथिता।*

**(टीका)** या पादम्पादम्प्रति शरेषु= पञ्चसु रसेषु= षट्सु (च) यामः= यतिर्यस्यां तथाभूता, एवम् भगण-तगण-नगण-गुरुद्वयोपेता, काव्यरसज्ञेषु विहिता= कृता पामा= खर्जूः (श्रवण-पठन-निर्माणाद्यभिलाषबाहुल्येन) यया एवंभूता सा पण्डितप्रधानैः इह=छन्दःशास्त्रे **कुड्मलदन्ती** कथिता=प्रोक्ता। अत्र प्रतिपादम्-( S||SS||||SS ) इत्येवं स्वरवर्णन्यासः ॥

**(प्रति०)** व्याख्याताः प्रतिशब्दाः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(भाषा)** जिस के प्रति चरण में भगण तगण नगण तथा दो गुरु हों और पांचवें तथा अन्तिम अक्षर पर विश्राम हो उसको **कुड्मलदन्ती** छन्द कहते हैं। इस के प्रत्येक चरण के स्वरचिह्न– ( SIISSIIIISS ) ऐसे हैं ॥ ४५ ॥

वैश्वदेवी

**ह्रस्वो वर्णश्चेत्सप्तमोऽथो नवान्त्यो,**
**बाणैरश्वैः स्याद्यत्र विश्रामयोगः ।**
**माभ्यां याभ्यां सा निर्मितैकैकपादा,**
**प्रोक्ता काव्यादौ वैश्वदेवी सुधीभिः ॥४६॥**

**(अन्वयः)** *यत्र सप्तमः अथो नवान्त्यः वर्णः ह्रस्वश्चेत् बाणैः अश्वैः विश्रामयोगः स्यात्, माभ्यां याभ्यां निर्मितैकैकपादा सा सुधीभिः काव्यादौ वैश्वदेवी प्रोक्ता ।*

**(टीका)** यत्र= यस्यां प्रतिचरणं सप्तमः अथो= अथच नवान्त्यः= दशमः वर्णः ह्रस्वश्चेत् तथा बाणैः= पञ्चभिस्ततश्च अश्वैः= सप्तभिर्वर्णैर्विश्रामयोगः= यतिसम्बन्धः स्यात्, मगण मगण-यगण-यगणैर्निर्मित एकैकः पादो यस्यास्तथाभूता सा काव्यादौ सुधीभिर्वैश्वदेवी प्रोक्ता= कथिता। अत्र प्रतिचरणम् (SSSSSSISSISS) इत्येष स्वरवर्णन्यासनियमः ॥

**(प्रति०)** *व्याख्याताः सर्वे* ॥

**(भाषा)** जिस के एक एक चरण में सातवाँ और दसवें अक्षर लघु हो एवं पांचवें तथा अन्तिम अक्षर पर विश्राम हो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उस को **वैश्वदेवी** छन्द कहते हैं। इस के प्रत्येक चरण में दो मगण तथा दो यगण रहते हैं अत एव स्वर चिह्न- (SS-SSSS|SS|SS) इस प्रकार जानना चाहिये ॥ ४६ ॥

### कुसुमविचित्रा

**न-य-न-य-कामा रस-रस यामा,**
**प्रतियतदेशे गुरुयुगयुक्ता।**
**श्रुतिपथचित्रा 'कुसुमविचित्रा'**
**मृदुतमवर्णा सुकविभिरुक्ता ॥ ४७ ॥**

**(अन्वय:)** *न-य-न-य-कामा रस-रस-यामा प्रतियतदेशे गुरुयुगयुक्ता श्रुतिपथचित्रा मृदुतमवर्णा सुकविभिः कुसुम-विचित्रा उक्ता ॥*

**(टीका)** न-य-न-यानाँ नगण-यगणानां कामोऽभिलाषः सम्बन्ध इति यावत्, यस्यास्तथाभूता प्रतिपादं नगण-यगण-नगण-यगणोपेतेत्यर्थः, रसेषु रसेषु=षट्सु षट्सु वर्णेषु यामः= यतिर्यस्यां तथोक्ता, यता:=यतियुक्ताः देशाः=प्रदेशा यतदेशाः यतदेशान् यतदेशान् प्रतीति प्रतियतदेशं तस्मिन् प्रत्येकयति-प्रदेश इत्यर्थः, गुरुयुगयुक्ता= गुरुद्वयसहिता अत एव जनानां श्रुतिपथचित्रा= श्रवणयोग्या मृदुतमाः= अतिकोमलाः वर्णाः= अक्षराणि यस्यां तादृशी सुकविभिः **कुसुमविचित्रा** उक्ता= कथिता। अत्र प्रतिचरणम् (||||SS||||SS) इत्येष स्वरवर्णक्रमः।

*अत्राऽर्थान्तरमप्यभिप्रेतं, तथा हि—*

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(टीका)** नयने याति= प्राप्नोतीति नयनयः= विशालनेत्रः सुन्दरः पुरुष इति यावत्, नयनयस्य कामः= अभिलाषो यस्याः सा नयनयकामा तथा रसे रसे= प्रतिरसं ( शृङ्गारादिरूपे) यामः= प्रहरो यस्याः सा (एकैकरसं= चुम्बनादिरूपं प्रति प्रहरसमयव्यापिनी) किञ्च- प्रतियतः= वस्त्रादिना संवृतो यो देशस्तस्मिन्नर्थाद्वक्षःस्थले गुरुद्वयसहिता= विशालस्तनद्वयोपेता एवं मृदुतमः= अतिकोमलो वर्णः= रूपलावण्यं यस्याः सा श्रुतिपथे= श्रवणमार्गे चित्रा= आश्चर्यकारिणी कुसुमैः= पुष्पैर्विचित्रा= यथास्थानविन्यस्तपुष्पतया रसिकजनमनोहारिणी अत एव नाम्नाऽपि **कुसुमविचित्रा**' सुधाविभिरुक्तेति ॥

**(प्रति०)** व्याख्याताः प्रतिशब्दाः ॥

**(भाषा)** नगण यगण नगण तथा यगण से युक्त रहने के कारण जिस के प्रत्येक चरण के छठे २ अक्षर पर विश्राम हो और पांचवाँ तथा छठा एवं ग्यारहवाँ तथा बारहवाँ अक्षर गुरु हों उस को कविलोग **कुसुमविचित्रा** छन्द कहते हैं। इस के स्वरचिह्न- (।।।।ऽऽ।।।।ऽऽ) इस प्रकार हैं ॥ ४७॥

स्रग्विणी

**मध्यमं मध्यमं चेल्लघुत्वं व्रजेत्,**
**सर्वपादेषु सर्वत्र वर्णत्रिके ।**
**अन्त्यवर्णैर्विरत्या सदा रै-रतां,**
**स्रग्विणीमूचिरे तां तदा कोविदाः॥ ४८ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(अन्वयः)** चेत् सर्वपादेषु सर्वत्र वर्णत्रिके मध्यमं मध्यमं लघुत्वं व्रजेत्, अन्त्यवर्णैर्विरत्या सदा रैः रतां तां तदा कोविदाः स्रग्विणीम् ऊचिरे ॥

**(टीका)** यदि चेत् सर्वेषु पादेषु सर्वस्मिन् वर्णत्रयसंघे मध्यमं मध्यमक्षरं लघुत्वं व्रजेत्= प्राप्नुयात्, अन्त्यवर्णैः= पादान्तस्थैर्वर्णैर्विरत्या= विरामेण उपलक्षिताम् (उपलक्षणे तृतीया) सदा= सर्वदा रैः= रगणैः सह रतां रगणैर्बद्धामिति यावत् तां तदा कोविदाः= विद्वांसः **स्रग्विणीम्** उक्तवन्तः। तेनात्र-(ऽ।ऽऽ।ऽऽ।ऽऽ।ऽ) इत्येव प्रतिपादं स्वरवर्णन्यासो बोध्यः

*इहापि पक्षान्तरं, तथाहि—*

**(टीका)** सर्वत्र वर्णत्रिके ब्राह्मण-क्षत्रिय-वैश्यात्मके (शूद्रेषु तादृक्सौन्दर्यस्य क्वचिदप्यदृष्टचरत्वात्) (कुले उत्पन्नायाः) यस्याः सर्वपादेषु प्रतिचरणनिक्षेपेषु मध्यमं= मध्यमस्थानं कटिप्रदेशरूपमिति यावत् लघुत्वं व्रजेत्, अन्त्यवर्णैः= चाण्डालादिभिः सह विरत्या प्रीत्यकरणेन विशिष्टजातीयकैः सदारैः स्त्रीसहितैरपि सह रताम्= अनुरक्तां, यद्वा सतः= सज्जनान् ऋच्छन्ति= प्राप्नुवन्तीति सदारास्तैः सह रताम्, अथवा सदा सर्वदा रायि= धने रतां= धनवतीं **स्रग्विणीं**= मालावतीं कोविदा उक्तवन्त इति ॥

**(प्रति०)** **लघुत्वं**= लघुताम्। **ऊचिरे**= उक्तवन्तः। व्याख्यातमन्यत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**(भाषा)** जिस के प्रत्येक चरण में चार रगण हों तथा अन्तिम वर्ण पर ही विश्राम हो उसे **स्रग्विणी** छन्द कहते हैं। इस के स्वर चिह्न--(SISSISSISSIS) इस प्रकार हैं॥ ४८॥

**प्रहरणकलिता**

**गुरु-पर-तुरगोपरि-कृतविरमा,**
**न-न-भ-न-सुगणैर्लघुगुरु-चरमा।**
**प्रहरणकलिताऽकलि कृतिमुखरै-,**
**रसिकरसकलोचितजयललिता॥४९॥**

**(अन्वयः)** *गुरु-पर-तुरगोपरिकृतविरमा न-न-भ-न-सुगणैर्लघुगुरुचरमा रसिक-रस-कलोचित-जयललिता कृतिमुखरैः प्रहरणकलिता अकलि॥*

**(टीका)** गुरुः= गुरुवर्णः परः= अन्त्यो येषां तादृशा ये तुरगाः= सप्त सप्त वर्णास्तदुपरि= तेषां तेषामन्तेऽर्थात्सप्तमे सप्तमे वर्णे कृतो विरमः= विश्रामो यया सा नगण-नगण-भगण-नगण-रूपसुन्दरगणैः सह (सहार्थे तृतीया) लघुवर्णो गुरुवर्णश्च क्रमेण चरमः= अन्त्यो यस्याः सा, रसिकानां रसकलाया उचितो यो जयः= जयशब्दस्तेन ललिता काव्यमिदं नैपुण्येन दृष्टेति यावत्, कृतिमुखरैः= पण्डितप्रवरैः 'प्रहरणकलिता'

---

(१) 'पृथग्विनानानाभि' रित्यादिवत 'सहेनाप्रधान' इति न्यासेनैवसिद्धे युक्तग्रहणं सहशब्दप्रयोगाऽभावेऽपि तदर्थसत्तामात्रेऽपि तृतीयेति बोधनार्थं,-अत एव वृद्धो यूनेतिनिर्देशः सङ्गच्छते। स्पष्ट चेदं 'सहयुक्त' इति सूत्रे शब्देन्दुशेखरे॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अकलि= निरचायि= निश्चितेत्यर्थः । अत्र प्रहरणे= संग्रामे कलिता= प्रहरणायोग्यता काचित् स्त्र्यपि व्यज्यते, सा कीदृशी ? गुरुः= स्थूलः परः= कटिपश्चाद्भागो यस्य तादृशो वस्तुरगः= हयस्तदुपरि (तमारुह्य) कृतो विरामो=विश्रामो यया, पुनः नन-भन-नामकैः सुन्दरगणैः अर्थात् नन-भनादिनामकयोद्र्गणैरुपलक्षिता, पुनश्च लघुगुरून्= क्षुद्रमहद्रूपान् चरान्= गुप्तदूतान् मालि= परिमाति= परिचिनोतीति यावत् इति लघुगुरुचरमा अत एव असिः= खड्गः करेषु येषां ते च ते सकला असिकरसकलाः= खड्गाग्रिसकलभृत्यास्तेषामुचितो यो जयः= जयध्वनिस्तेन कलिता कृतिगुरुभिः= महाचतुरैः ( विपक्षिगतैः ) अकलि= अन्वमायि= अनुमितेति । अत्र प्रतिचरणम्–(||||||S||||||S) इति स्वरवर्णन्यासः ॥

(प्रति०) व्याख्याताः प्रतिशब्दाः ।

(भाषा) जिस के प्रत्येक चरण का सातवाँ तथा चौदहवाँ अक्षर गुरु हो और वहीं पर विश्राम हो उस को **प्रहरणकलिता** छन्द कहते हैं । इस के प्रत्येक चरण में नगण नगण भगण नगण एक लघु तथा एक गुरु रहते हैं अत एव स्वर-चिह्न–( ||||||S||||||S ) इस प्रकार जानना चाहिये ॥ ४९ ॥

### भ्रमरविलसित

**पादे पादे म-भ-न-ल-ग-चितं,**
**तुर्यैरश्वैः कृतयतिललितम् ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**काव्याम्भोजावनिमनुचलितं,**

**पश्याऽऽश्चर्यं भ्रमरविलसितम् ॥५०॥**

**(अन्वयः)** *पादे पादे म-भ-न-ल-ग-चितं तुर्यैरश्वैः कृतयतिललितं काव्याम्भोजावनिम् अनु चलितम् आश्चर्यं 'भ्रमरविलसितं' पश्य ॥*

**(टीका)** पादे पादे= प्रतिचरणं मगण-भगण-नगण-लघु-गुरुभिश्चितं= व्याप्तम्, तुर्यैः= चतुर्थैः अश्वैः= सप्तमैश्च वर्णैः कृता या यतिस्तया ललितम्= सुन्दरम्, काव्याम्भोजावनिम्= काव्यरूपकमलस्थानम् अनु= लक्ष्यीकृत्य चलितम्= प्रस्थितम् अतएव आश्चर्यम् आश्चर्यकारि **भ्रमरविलसितम्** एतन्नामकं वृत्तं भ्रमरविलासं च पश्य= अवलोकय । अत्र प्रतिचरणम्- (SS-SS|||||S) इति स्वरवर्णन्यासः ।

**(प्रति०)** *प्रतिशब्दा व्याख्याताः ।*

**(भाषा)** जिस के प्रत्येक चरण में मगण भगण नगण एक लघु तथा एक गुरु हो तथा चौथे और अन्तिम अक्षर पर विश्राम हो उस को **भ्रमरविलसित** छन्द कहते हैं । इस के एक एक चरण के स्वरचिह्न-(SSSS|||||S) इस प्रकार हैं ॥५०॥

स्रक् (माला)

**वसु-हय-यतिरतिशयितमृदुपदा,**

**प्रतिचरणकचरमकलितगुरुता ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**स्रगिह कविहृदयकमलविरचिता,**
**सुखयति जगति तु कमपि सुकृतिनम्।५१।**

**(अन्वयः)** *वसु-हय-यतिः अतिशयित-मृदु-पदा प्रतिच-रणक-चरम-कलित-गुरुता कवि-हृदय-कमलविरचिता स्रक् तु इह जगति कम् अपि सुकृतिनं सुखयति ॥*

**(टीका)** पूर्वं वसुषु= अष्टस्वष्टसु ( तदनन्तरं ) हयेषु= सप्तसु सप्तसु वर्णेष्वर्थात् प्रतिपादं पूर्वमष्टमे ततः सप्तमे वर्णे च यतिर्यस्यां सा तथाभूता, अतिशयितानि= अतिशयं प्राप्तानि मृदूनि= कोमलानि पदानि यस्याः सा, प्रतिचरणकम्=प्रतिचरणं प्रत्येकचरणस्येति यावत् चरमे= अन्ते कलिता= धृता गुरुता यया सा, कवीनां हृदयान्येव कमलानि तैर्विरचिता=निर्मिता स्रक्=माला (एतन्नामकं वृत्तं मालाविशेषश्च)तु इह जगति कमपि= दिव्यगुणशालिनं सुकृतिनं= धन्यं जनं सुखयति= आनन्दय-तीत्यर्थः। अत्र प्रतिचरणम्—(।।।।।।।।।।।।।।ऽ)इति स्वरसंस्थानम् ॥

**(प्रति०)** *व्याख्याताः प्रतिशब्दाः, स्पष्टाश्च शिष्टाः ॥*

**(भाषा)** जिस के प्रत्येक चरण के छठे और अन्तिम अक्षर पर विश्राम हो तथा चरण का अन्तिम २ अक्षर गुरु हो उस को **स्रक्** ( माला) छन्द कहते हैं। इस का प्रत्येक चरण चार नगण दो लघु एवं एक गुरु से बनता है अत एव स्वरचिह्न— ( ।।।।।।।।।।।।।।ऽ ) इस प्रकार हैं ॥ ५१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## वियोगिनी

**स-स-ज-त्रितयात्परो गुरु-,**
**विषमे स्याच्चरण-द्वयेऽथ चेत् ।**
**स-भ-रा अपरत्र लो गुरुः,**
**कविना तत्कथिता वियोगिनी ॥८२॥**

**(अन्वयः)** *अथ चेत् विषमे चरणद्वये स-स-ज-त्रितयात् परः गुरुः स्यात्, अपरत्र स-भ-राः लः गुरुः तत् कविना वियोगिनी कथिता ॥*

**(टीका)** अथ=यदि चेत् विषमे प्रथम-तृतीयरूपे चरणद्वये=पादयुगले सगण-सगण-जगणरूपात् त्रितयात्परः=परत्र गुरुः, अपरत्र=अपरस्मिन्= समे चरणद्वये सगण-भगण-रगण-लघु-गुरवः स्युः तत्=तदा कविना **वियोगिनी** कथिता । अत्र प्रथम-तृतीययोश्चरणयोः ( ||S||S|S|S ) इति, द्वितीय-चतुर्थयोश्च ( ||SS||S|S|S ) इत्येवं स्वरवर्णक्रमो बोद्धव्यः ॥

**(प्रति०)** **लः=** लघुः । स्पष्टमन्यद्व्याख्यातञ्च ॥

**(भाषा)** यदि पहले तथा तीसरे चरण में दो सगण एक जगण और गुरु हो तथा दूसरे एवं चौथे चरण में सगण-भगण रगण के अनन्तर एक लघु तथा अन्त में एक गुरु हो उसे **वियोगिनी** छन्द कहते हैं । अत एव इस के पहले और तीसरे चरण के स्वरचिह्न-( ||S||S|S|S ) इस प्रकार तथा दूसरे और चौथे चरण के-(||SS||S|S|S) इस प्रकार हैं ॥८२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## पुष्पिताग्रा

**विषमचरणयोर्न-नौ र-यौ चे-,**
**न-ज-ज-रगाश्च तदन्यपादयोः स्युः।**
**कविकुलमधुपान् प्रमोदयन्ती,**
**तदिह मताऽब्जलतेव पुष्पिताग्रा ॥५३॥**

**(अन्वयः)** *चेत् विषमचरणयोः न-नौ र-यौ, तदन्य-पादयोः न-ज-ज-रगाश्च स्युः, तत् इह कविकुलमधुपान् प्रमोदयन्ती अब्जलतेव पुष्पिताग्रा मता ॥*

**(टीका)** यदि चेत् विषमचरणयोः, अर्थात् प्रथम-तृतीय-पादयोः नगण-नगण-रगण-यगणाः, तदन्यपादयोः = द्वितीय-चतुर्थचरणयोः नगण-जगण-जगण-रगण-गुरवः स्युः, तत् = तदा इह = छन्दःशास्त्रे कविकुलमधुपान् = कविजनभ्रमरान् प्रमोदयन्ती = हर्षयन्ती पुष्पितः अग्रः = अग्रभागो यस्याः स्तादृशी अब्जलतेव = कमलवल्लीव **पुष्पिताग्रा** मता = ख्याता। अत्र क्रमेण प्रथम-तृतीययोः- ( ||||||S|S|SS) इति, द्वितीय-चतुर्थयोश्च (||||S||S|S|SS) इति स्वरवर्णक्रमः ॥

**(प्रति०)** *व्याख्याताः प्रतिशब्दाः ॥*

**(भाषा)** जिस के पहले तथा तीसरे चरण में दो नगण एक रगण और एक यगण हो, तथा दूसरे और चौथे में एक नगण दो जगण एक रगण और एक गुरु हो उसको **पुष्पिताग्रा**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



छन्द कहते हैं। इस के पहले और तीसरे चरण के स्वरचिह्न—( ।।।।।ऽ।ऽ।ऽऽ ) इस प्रकार, तथा दूसरे और चौथे चरण के ( ।।।ऽ।।ऽ।ऽ।ऽऽ ) इस प्रकार हैं ॥ ५३ ॥

द्रुतमध्या

**चेद् भ-भ-भैः सह ग-द्वययुक्तौ,**
**प्रथम-तृतीयपदौ नियमात् स्तः ।**
**ना-ज्ज-ज-यै रचिताववशिष्टौ,**
**भुवि विदिता तदसौ द्रुतमध्या ॥५४॥**

**(अन्वयः)** *चेत् प्रथमतृतीयपदौ नियमात् भ-भ-भैः सह ग-द्वययुक्तौ, अवशिष्टौ नात् ज-ज-यैः रचितौ स्तः तत् असौ भुवि द्रुतमध्या विदिता ॥*

**(टीका)** यदि चेत् प्रथम-तृतीय चरणौ भगण-भगण भगण-गुरुद्वय-युक्तौ, अवशिष्टौ= द्वितीय-चतुर्थचरणौ नगणात् परतो ये जगण-जगण-यगणास्तै रचितौ=निर्मितौ स्तः=भवतः तत्= तदा असौ=सा भुवि= भूतले **द्रुतमध्या** विदिता= ख्याता। अत्र प्रथमतृतीयचरणयोः-(ऽ।।ऽ।।ऽ।।ऽऽ ) इति, द्वितीय-चतुर्थ चरणयोश्च— (।।।ऽ।।ऽ।।ऽऽ) इति स्वरवर्णन्यासोऽवगन्तव्यः ॥

**(प्रति०)** *प्रतिशब्दा व्याख्याताः ॥*

**(भाषा)** यदि तीन भगण और दो गुरु अक्षरों से पहला तथा तीसरा चरण, एवं एक नगण दो जगण तथा एक यगण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



से दूसरा और चौथा चरण बनता हो तो उसे **द्रुतमध्या** छन्द कहते हैं। अत एव इसके पहले और तीसरे चरण के स्वरचिह्न ( ऽ।।ऽ।।ऽ।।ऽऽ ) इस प्रकार, और दूसरे तथा चौथे चरण के ( ।।।।ऽ।।ऽ।।ऽऽ) इस प्रकार हैं ॥ ५४ ॥

### समाप्तिश्लोक

**वर्षे सिन्धु-वसु-ग्रहे-न्दु-तुलिते पक्षे सिते पञ्चमी-,**
**तिथ्यामग्रयणे जिनेन्द्रचरणाम्भोजद्वयं ध्यायता।**
**लालान्तेन जवाहिरेण मुनिनाऽऽचार्येण तत्त्वार्थिनां,**
**प्रीत्यै स्थानकवासिना विरचितोऽसौ वृत्तबोधो मया॥**

**॥ इति वृत्तबोधः समाप्तः ॥**

**(अन्वयः)** *सिन्धु-वसु-ग्रहे-न्दु-तुलिते वर्षे, अग्रयणे, सिते पक्षे, पञ्चमीतिथ्यां जिनेन्द्रचरणाम्भोजद्वयं ध्यायता स्थानकवासिना सुधिया लालान्तेन जवाहिरेण आचार्येण मया तत्त्वार्थिनां प्रीत्यै असौ वृत्तबोधः विरचितः॥*

**(टीका)** सिन्धवः= चत्वारः, वसवः= अष्टौ, ग्रहाः= नव, इन्दुः= एकः, तत्तुलिते= तन्मिते, अर्थादङ्कानां वामतो गत्या १९८४ एतत्परिमिते वर्षे अग्रयणे= अग्रयण-मासे सिते= शुक्ले पक्षे पञ्चमीतिथ्यां जिनेन्द्र-चरण-कमलद्वयं ध्यायता स्थानकवासिना (साधुमार्गिणा) मुनिना लालान्तेन जवाहिरेण=

---

(१) संज्ञात्वाच्च पुंवत्त्वम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जवाहिरलालेन आचार्येण मया तत्त्वार्थिनाम्= अश्लीलार्थपरित्यागेन सारग्राहिणां प्रीत्यै= प्रमोदाय असौ वृत्तबोधो विरचितः ॥

(प्रति०) अग्रयणे= मार्गशीर्षे । स्पष्टमन्यद्व्याख्यातं च ॥

मर्त्यँल्लिसिन्धुवसु-भ्रेद–, चन्द्रमितेऽब्दगणमासि गुरुभक्तः ।
अहि-तिथि-वलक्षपक्षे, चासीलालो व्यधा-ट्टीकाम् ॥

॥ इति वृत्तबोधटीका समाप्ता ॥

(**भाषा**) श्री जिन भगवान् के चरण-कमलों को हृदय में रखकर स्थानकवासी मुनि श्रीजवाहिरलाल आचार्य ने सारग्राही सज्जनों के सन्तोष के लिये १९८४ वें वर्ष के मृगशिर महीने के शुक्ल पक्ष की पञ्चमी तिथि में इस वृत्तबोध को रचा ।५५।

**इति वृत्तबोधभाषा समाप्ता ॥**

**॥ समाप्तोऽयं ग्रन्थः ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुस्तक मिलने का पता—

**अगरचन्द भैरोंदान सेठिया**

जैन शास्त्रभण्डार (लाइब्रेरी)

बीकानेर [राजपूताना]

सेठिया जैन प्रिंटिंग प्रेस बीकानेर में मुद्रित १७-

For Private And Personal Use Only